Then comes the queen attended by singing and dancing girls. The queen shows the Mādhavî and Mango couple to the king. The king and queen are engaged in the marriage ceremonies. Pārijātamañjarī, the heroine, as previously settled witnesses them from a retired corner and from behind a fence of small trees and creepers. Vasantalīlā who is with her, hits upon and carries out the ingenious plan of causing the image of Pārijātamañjarī to be reflected from some ornament of the queen's, so that it might be observed by the king. She partly removes the foliage in front of the face of Pàrijàtamanjari, whose reflection falls on the ear-ornament (tâdanka) of the queen. The king notices the reflection and, holding the queen's ear, looks intently at it, and is absorbed in a deep sensation of pleasure. Vasantalîlà directs the attention of Pārijātamañjarī to the ear-ornament of the queen, where she sees her own image as well as that of the king side by side as at nuptials. Pārijātamañjarī entertains a doubt whether it

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

was the ear-ornament or her own reflection that attracted the king's notice so much. Vasantalīlā marking her incredulity, hides her behind the foliage. The king instantly becomes disturbed and agitated at the sudden disappearance of the image of his love. He looks back and catches a glimpse of Pārijātamanjari through the foliage. Pàrijàtmanjari also throws a side-long look of love at the king. But the king immediately remembering where he was, looks at the ear-ornament as before. Kanakalekhā, the queen's maid and Vidùshaka the jester who were observing what was going on between the king and Pārijātamanjari, look at each other and smile significantly.

The queen who so long held her ear steady for the king, now lost her patience. Her right eye began to throb.[1] She eagerly looked up at her maid, marked the maid's smile and seeing the king making some signs to her, suspected intrigue, and angrily left the king. Pārijātamañjarī and Vasantalīlā, thinking that the king would now follow the queen to appease her anger, also left the spot, where they had screened themselves from public gaze and wended their way towards the Emerald Bower.

Thus when the king turned back to have a look again at his love, he did not see her. The king and his friend Vidūshaka bend their steps towards the Emerald Bower. The king descries Pārijātamañjarī from a distance. He collects flowers and going secretly forward throws them one by one at her. Seeing the king and taking him to be the God of love in person darting his flowery arrows at her, she faints. The king comes up and touches her bosom with an emotion of pity and affection; Vasantlīlà fans her and calls her affectionately.

Recovering her consciousness, Pārijātamañjarī wishes to depart, but is detained by the king, who implores her for the favour of a sweet look and a smile.

---

1. The throbbing of the right eye of a woman is an ill omen betokening some future evil.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

In the meanwhile the queen's maid Kanakalekhā is seen at a distance approaching the Emerald Bower, with the queen's ear-ornament in her hand. Kanakalekhā reflects on her difficult and delicate position as a mediator between the king and the queen and in her soliloquy passes remarks to the king caught in the snares of love.

The king seeing the queen's messenger, puts Pàrijàtamañjarī, behind his back. Kanakalekhā presents, on behalf of the queen, the ear-ring to the king and communicates to him the taunting message with which she was commissioned by her mistress.

The king understands the taunt and determines to go instantly to propitiate the queen and requests Kanakalekhā to lend her help in turning away her wrath.

Bards announce the coming on of the evening by a song.

Pārijātamañjarī is sad, and dejected at the thought of the king's departure. The king is touched at this and promises to return soon. He instructs Vasantalilā to take good care of her and departs. While parting he often turns his looks back to her and at last with a heavy heart leaves her.

Pārijātamanjarī looks at the king until he goes beyond the range of vision. She thinks of doing to her own self what she imagined the queen would do to her. Vasantalīlā bears her up and comforts her; but from her intense gloominess, she suspects danger and feels the necessity of keeping a more vigilant eye upon her movements.

Here ends the 2nd act named "Ear-Jewel Mirror" (ताडंकदर्पण).

(At the end, it is stated that the Praśasti (Eulogy) was engraved by the expert artisan Rāmadeva, a silver-smith, son of Sīhāka.)

K. K. LELE,

Dhar, 30-12-1903

Superintendent of Education, Dhar.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राजगुरु–श्रीमदन–विरचिता धारास्थ–शिलापट्टलिखिता

पारिजात-मञ्जरीत्यपराख्या

विजयश्रीर्नाम नाटिका।

1 सिद्धम्†। ओं सरस्वत्यै नमः॥ अत्र कथंचिदलिखिते श्रुतिलेह्यं लिख्यते शिला-युगले। भोजस्यैव गुणोर्जितमर्जुनमूर्त्याऽवतीर्णस्य ॥१॥ तत्तादृक्सुमनो-मनोहर–तनुर्वामांग-शृंगारिणी मुष्टि-स्वीकरणीय-मध्य-मधुरावष्टम्भनम्राकृतिः। आकर्णान्त-नटत्कटाक्षविशिख-व्यापार-धन्या जयत्यन्या चापलतेव चन्द्र-सुहृदो

2 देवस्य कान्ता रतिः॥ २॥ अपि च। वल्गा(लग)द्वा (द्वा)ण-जय–क्षमो विजयते निःशेष–गो–त्राण–कृत्कृष्णः कृष्ण इवार्जुनोऽर्जुन इव श्रीभोजदेवो नृपः। विस्फूर्जद्विषमेषु–वेधविधुरां राधां विधत्ते स्म यस्तूर्णं पूर्ण–मनोरथश्चिरमभूद्गांगेय–भंगोत्सवे॥ ३॥ नांद्यंते* सूत्रधारः†। आर्ये इतस्तावत्। प्रविश्य नटी। आणवेदु अज्जो।[१] सूत्र। प्रिये [।*] आ–

(१) आज्ञापयत्वार्यः।

* Cf. " आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः।
नान्दीति कथ्यते...।" –भारतीय–नाटयशास्त्रम्
" नन्दन्ति काव्यानि कवीन्द्रवर्याः
कुशीलवाः पारिषदाश्च सन्तः।
यस्मादलं सज्जनसिन्धुहंसी
तस्मादलं सा कथितेह नान्दी॥'–नाटय–प्रदीप.

Here we have पत्रावली type of Nāndī ; cf. :—
" यस्यां बीजस्य विन्यासो ह्यभिधेयस्य वस्तुनो।
श्लेषेण वा समासोक्त्या नान्दी पत्रावलीति सा॥"

† Cf–' वर्तनीयतया सूत्रं प्रथमं येन सूच्यते।
रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते॥'–संगीत–सर्वस्व.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 दिष्टोऽस्मि तत्रभवत्या परिषदा (।)‡ यथाऽद्य त्वयाऽस्मिन्नेव चैत्रपर्वणि§ चतुरशीति-चतुःप(तुष्प)थ-सुर-सदन-प्रधाने धारापुरी-युवति - शृंगार-मुक्ता-स्रजो जगज्जडतांधकार--शातन-शरच्चंद्रिकायाः सा(शा)रदा-देव्याः सद्मनि सकल- दिगंतरोपागतानेक-त्रैविद्य-सहृदय-कला-कोविद-रसिक-सुकवि-संकुले गौडान्वय-गंगा-पुलिन-रा-

4 जहंसस्य गंगाधरायणेर्म[दनस्य रा]जगुरोः कृतिरभिनवा समस्त-सामाजिक*-मधुव्रतानंद-मकरंद-प्रपा पारिजात-मंजरीत्यपराख्या विजय-श्रीर्नाम नाटिका नाटयितव्या। तदाविर्भाव्यतां रंग-मंगल-संपदां संप्रदायः। नटी [।*] सहर्षं। जं अज्जो आणवेदि।[१] किं च मए वि सुणिदं (।) जधा मलयानिलमंदमंदंदोलणमहमहंत-

---

(१) यदार्य आज्ञापयति। किं च मयाऽपि श्रुतं यथा मलयानिल-मन्द-मन्दान्दोलन - प्रसरद्गन्ध - माकन्द-मुकुल[1] - मकरन्द - पिण्डित-पराग-पुञ्ज-पिञ्जरीयमाण[2] - मञ्जरी-कवल-परस्परार्पण-केलि-पर्याकुल-कलकण्ठ-मिथुन-मधुर-कलकल-हेलापहस्तित-विहस्त-मनस्विनी-मान-मपि[3]। परिमल -तरंग-चारु-चम्पक-चषक-मधूत्थ-कदर्थित[4]-षच्चरण-चारण-रणज्झणत्कार-मुखरमपि। यन्त्र-कुञ्जर - शीकरासार - सेक-सरस-विकसद्विविध-विटप-कुञ्ज[5]-बद्धान्धकारमपि धारागिरि-लीलो-द्यानं परिहृत्य कौतूहल-प्रफुल्ल-लोचनो भारती-भवनाभिमुखं सहसेव[6] परापतित एव लोक इति। तत्कथय कीदृशमत्र कथा-संविधानकम्।

---

‡ Cf. अभिज्ञानशाकुन्तल, I :–' अभिरूप-भूयिष्ठा परिषदियम्। etc. '

§ Later this is called वसन्तोत्सव (1. 13; 31). Cf. कर्पूर-मञ्जरी I. 18, where it is called चैत्रमहोत्सव.

* cf. मालतीमाधव, I. :–' ० यात्राप्रसङ्गेन नानादिगन्तवास्तव्योऽयं महाजनसमाजः।...तेन हि तत्प्रयोगादेवात्रभवतः सामाजिकानुपास्महे। '

Dr. Hultzsch reads here; 1 मकुल. 2 पिञ्जर्यमाण. 3 विहस्त-मानवती–मानमपि। 4 चषक–मध्ववसर–विलम्बित. 5 कडङ्ग. 6 सहसेति.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

5 मायंद-मउल-मयरंद - [पिंडि]द-पराय - [पुंज]-पिंजरिज्जंत - मंजरी-कवल-परप्परोप्पण-केलि- पज्जाउल - कलयंठ - मिहुण - महुर-कलयल-हेलावहत्थिद-विहत्थ-मा(म)णंसिणीमाणं पि।

परिमल-तरंग-चंग-चंपय- चसय -महुच्छ(त्थ)-कच्छक्किद-छच्चरण-चारण-रणझणक्कार-मुहलं पि।

जंत-कुंजर-कर-सीयरासार-सेय-सरस-विअसं-

6 [त-]

विविह-विडव-कुडंग-वद्धंधयारं पि। [। ३ अ ॥*]‡

धारागिरि-लीलोज्जाणं परिहरिय कोदुहल्ल-पंफुल्ल-लोयणो [।*]

भारही-भवणहुत्तं सहस त्ति परावडिदो ज्जेव लोओ त्ति। [। ३ व ॥*]‡

ता कधेहि केरिसं इत्थ कधा-संविहाणयं। सूत्र ।आकाशे। किमाचक्षते भवंतः।

स्थाने सुमनसां स्त्रीत्वं मृद्वीनामतिसुंदरं।

याश्चैत्रं कांतमासाद्य वि(वि)भ्रति स्मित-मा-

7 धुरीं। [। ४ ॥*]

तद्भोः साधूक्तं। नटीं प्रति च। आर्ये [।*] श्रुतं त्वया। सुमनसः स्त्रीत्वमिति। नटी। अध इं।[1] सूत्र। प्रिये [।*] शृणु तर्हि [।*] त्रिविधवीर-चूडामणेः सार्वभौमश्रीभोजदेवान्वयमूर्द्धन्यस्य राज्ञः श्रीमदर्जुनवर्मदेवस्य गूर्जरपतिना जयसिंहेन सह पर्वपर्वतोपत्यकापरिसरेषु हिरण्यकसि(शि)पु-

कुपित-वैकुंठ-कंठीरव-कंठ-

8 नाद-चकित-दिग्वारणेंद्र-मुक्त- विश्वंभरा- निपतनोद्वेल- सप्ता-र्णव-लहरि-संफेट-तुल्य-तुमुल-कोलाहलः कलहो व(व)भूव ॥ नटी ॥ अज्ज [।*][2] जहिं चउरंग व(व)ल-जुअल-धूली-कडप्पेहिं कवलिदम्मि

(१) अथ किम्।

(२) आर्य। यत्र चतुरङ्ग-बल-युगल-धूलि-कदम्बः† कवलिते मार्तण्ड-मण्डले स्वयंवर-कौतूहल-हर्षोत्कर्ष‡-मिलत्सुरसुन्दरी-मुख-चन्द्र-चन्द्रातपेन निज-पर-विभागः संजातः श्रूयते।

* Dr. Hultzsch his not recognized these as being verses.

† Dr. Hultzsch reads:–' °धूलीनिकरैः '

‡ Dr. Hultzsch reads:–° कौतूहलाकुलत्व°.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मइंड-मंडले सयंवर-कोदुहल्ल-हल्लुप्फल-मिलंत-सुर-सुंदरी-मुहयंद-चंदायवेण निय-पर-विहाओ संजादो सुणीयदि ॥

५ सूत्र । आर्ये [।*] एवमेवैतत् । नटी । तदो २ [।*][१] सूत्र । ततश्च प्रतिव(ब)ले पलायमाने जयसिंधुर-स्कंधाधिरूढस्य धनुष्मतो धारापतेस्तत्कालोपसंहृत – नाराच – दुर्दिनस्य पुरंदर -पुर-द्वार-कपाट-विकटे वक्षसि लोकोत्तर-परिमलामोद-वासित-दिगंतरा विस्मेर-वृंदारक-वृंद-कुसुम-वृष्टि-मध्यादेका परिजात-मंजरी पपात ॥

10 नटी । सकौतुकं । तदो २[।*][२] सूत्र । ततश्च ।

अन्योन्यं गलहस्तनोपनतयोर्द्वंद्वेन वक्षोजयोः
कर्णोल्लंघन-जांघिकेन नयन-द्वंद्वेन हेवाकिनी ।
वक्त्रं विश्व-विलोचनोत्पलवनी-चंद्रोदयं वि(वि)भ्रती
सा [ऽ*] भृद्वा(द्वा)त्य-जिगीषु-यौवन-सुरा-माद्यत्तनुः कामिनी ॥ [५॥*]

तदैव चाकाशवाक् प्रादुरासीत् ।
मनोज्ञां निर्विशन्नेतां कल्या-
11 णीं विजयश्रियं ।
सदृशो भोजदेवेन धाराधिप भविष्यसि ॥ [६॥*]

नटी । अज्ज [।*][३] ता किं दिव्वमाणुसी एसा कधा । सूत्र । प्रिये न खल्वेवं । किंतु ।

या चौलुक्य-मही-महेन्द्र-दुहीता देवी जयश्रीः स्वयं
भंगे मृत्युमवाप वा(बा)ष्य(ष्प)सलिलैरंतःपुरस्योर्म्मिलैः ।
वप्तुः शोकतमालवाल-विपिनं चक्रे नदीमातृकं (।)
सेयं स्वर्द्रुम-मंजरी-कि-
12 सलये संक्रम्य जातांगना ॥ [७॥*]

नटी । सकरुणाश्चर्यं । तदो २ ।[४] सूत्र । ततश्च (।) देवेन जयकुंजरकुंभस्थलादाकृष्य तस्याः कुचस्थले दृष्टिं संचारितवता महाजनलज्जया सा

(१) ततस्ततः ।
(२) ततस्ततः ।
(३) आर्य । तत् किं दिव्यमानुषिक्येषा कथा ।
Dr. Hultzsch reads:—°माणुसीए सा° and translates it as:—' °मानुष्याः सा° '
(४) ततस्ततः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुसुमश्री[:*] कंचुकिनः कुसुमाकर-नामधेयस्योद्यानाधिकारिणः समर्पिता। तेन चानीय धारागिरि-गर्भ-मरकत-मंडपे वसंत-लीलां स्व-गृहि-

13 णीं योगक्षेमकारिणीं दत्वा(त्वा) स्थापिता। नेपथ्ये। इत इतो देवः। सूत्र। तत्रावलोकितकेन। प्रिये [।*]पश्य।

नारायणे[ऽ*] मात्यशुचौ निवेश्य
सौराज्यभारं स्वयमारुरोह।
देवो वसंतोत्सव-कौतुकेन
नवीनरत्नोज्व(ज्ज्व)लहर्म्यशृंगं ॥ [८ ॥*]

अहो रामणीयकं परमारमूर्द्धन्यस्य।
हयानन-तरंगित-त्रिविध-वीर-चूडामणि-

14 प्रगीत-रस-रंजितां रतिमवेक्ष्य मोट्टायिते।
यदीय-वि(वि)रुदं स्मरः परपुरंध्रिव(ब)न्धुं जगौ
स एष नृपसुंदरो जयति जैत्रचो(चै)त्रोत्सवे ॥ [९ ॥*]

सविस्मयं।

अंतःपुर-वनिताश्च द्विरद-घटाश्चाशु गूर्जरेंद्रस्य।
शृंखलिता यदनीकैः स एष सुभटक्षितींद्रसुतः ॥ [१० ॥*]

नटी। पासे उण अंतेउरिया विय कावि एसा।[१] सूत्र।

समुच्चयेन या

15 सृष्टा कलानां परमेष्ठिना।
कुंतलेंद्रसुता सेयं राज्ञः सर्वकला प्रिया ॥ [११ ॥*]

तदनया सहितो मानयतु मधूत्सवं देवः।

आवामप्यनंतरकरणीयाय सज्जीभवाव [।[२]] इति निःक्रां-

(निष्क्रा)तावा(न्तौ। आ)मुखं ॥*

ततः प्रविशति विदूषकेण सह वसंतवेषरमणीयो राजा। सा(स)ख्या सह राज्ञी च। राज्ञी। सहकार-मंजरीं दर्शयित्वा। सलीलस्मितं। अज्जउ-

16 त्त [।*][२] नोहलियं गेण्ह एदं।

---

(१) पार्श्वे पुनरन्तःपुरिकेव काऽप्येषा।

(२) आर्यपुत्र। नवफलिकां गृहाणैतान्। कोकिल-स्वर-बाहुल्येन मनोहरा प्रथममज्जर्येषा। तवोत्सवे खलु मया विनियुक्ता गायन्त्या यथा।

Dr, Hultzsch translated it as :—' °गायन्या यथा।'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कोइलसरवाहुल्लेण मणहरा पढम-मंजरी एसा।
तुह उच्छवम्मि हु मए विणिउत्ता गायणीइ जहा॥ [१२॥*]
राजा। सहर्षादरं। हस्तद्वयेन गृहीत्वा। देवि।
त्वयोपनीयमानो[ऽ*]यं सहकारांकुरो मया।
आत्तः पुष्पायुधस्येषुराज्ञास्वीकारलांछनं॥ [१३॥*]
अपि कुसुमे नवफलिका-व्यपदेशः पेशलांगि युक्तस्ते
17 । फलमेव कुसुममपि मे प्रसन्नया यत्त्वया दत्तं। [।१४॥*]
विदूषकः। साकूतं। अहो अच्चरियं [।*][1] भायधेएण वयस्सस्स कुसुम-मंजरी फलत्तणेण हत्थे चडिदा।
राजा॥ सोत्कंठमात्मगतं।

या मन्मथस्म (स्य) जयिनो[ऽ*]भिनवास्त्रदेवी
मूर्त्ता पपात हृदये मम युद्ध-भूमौ।
भंग्या मनोहरतनुं विजयश्रियं तां
प्राणेश्वरीमयमुदाहरते वय—
18 स्यः॥ [१५॥*] किं च।
या शारदी शशिकलेव कलेवरं मे
संग्रां(ग्रा)म-डामर-समुल्लसितप्रतापं।

---

(१) अहो आश्चर्यम्। भागधेयेन वयस्यस्य कुसुममञ्जरी फलवत्त्वेन हस्ते लग्ना[1]

---

* Cf. सूत्रधारो नटीं ब्रूते मार्ष वाऽपि विदूषकम्।
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम्।
प्रस्तावना -दशरूपक, III 8.

Also cf. 'स्वैरङ्गैश्चापि वीथ्यङ्गैः प्रकुर्यादामुखं बुधः।'—मातृगुप्ताचार्यः।

Also cf. 'नटी विदूषको वापि पारिपार्श्वक एव वा।
सूत्रधारेण सहिता संलापं यत्र कुर्वते॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि वा॥'

1 Dr. Hultzsch : फलत्वेन चटिता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लावण्य-कांति-सुधया स्नपयांचकार
सा मे हृदि स्खलति मन्मथविह्वलांगी ॥ [१६ ॥*]

नेपथ्ये वैतालिकाः ।

सुपहाय-सिरीसहिदो सुरो वि तुहुच्छवेण कीलंतो ।[1]
वा(बा)लायवसिंदूरं दियंगणाणं मुहे खिवइ ॥ [१७ ॥*]
जं सीमंताहिंतो हियं तए गुज्जरिंद-र-
19 मणीणं । मन्ने सिंदूरेणं तेण च्चिय रमइ तुह लोओ ॥ [१८ ॥*]
वा(बा)णेहिं अद्धनारी विसमसरेणावि नियरिऊ रइओ ।
अज्जुणवम्म तए उण अवल च्चिय विरइआ रिउणो ॥[१९ ॥*]×॥
विदू ॥ कलकलमाकर्ण्य । नेपथ्य[।*]वलोकितकेन । वयस्स[2][।*]पेच्छ
२ पहरिस-कीलिदं नायरजणस्स । राजा । सहकारमंजरीं
विदूषकस्यार्प-†
20 यित्वा । सकौतुकं पश्यन् । सखे किमुच्यते । राज्ञीं प्रति च । देवि
पश्य २ [।*] सिंदूरं क्वचिदट्टहासनिनदैरुद्दंडमुड्डीयते ।
कस्तूरीनिकरः क्वचित्क्वचिदपि श्रीखंडरेणूत्करः ।
कास्मी(श्मी)रद्रवशीकरैर्द्दतिमुखोन्मुक्तैरतिव्याकुलः
पौरैः स्वैरमनेकधायमधुना[ऽ*]रब्धो(ब्धो) मधोरुत्सवः॥[२०॥*]
अपि च । पौष्पैराभरणैर्मनोज्ञतनवः
21 स्वैरं दधत्यो [ऽ*]धुना
सिंदूरीमरुणीकृतालकलतां लेखां ललाटीतटे ।

---

(१) सुप्रभात-श्रीसहितः सूर्यो [ऽ*] पि तवोत्सवेन क्रीडन् ।
बालातपसिन्दूरं दिगङ्गनानां मुखे क्षिपति ॥ १७ ॥
यत्सीमन्ताद्धृतं त्वया गूर्जरेन्द्र- रमणीनाम् ।
मन्ये सिन्दूरेण तेनैव रमते तव लोकः ॥ १८ ॥
बाणैरर्धनारी विषमशरेणापि निजरिपू रचितः ।
अर्जुनवर्मस्त्वया पुनरबला एव विरचिता रिपवः ॥ १९ ॥'
(२) वयस्व । प्रेक्षस्व प्रेक्षस्व प्रहर्षक्रीडितं नागर-जनस्य ।

---

1 Cf. 'अस्त्रीकरोति जगतः विजये स्मरः स्त्रीरस्त्री जनः पुनरनेन विधीयते स्त्री ॥'

† Represented by a symbol.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नृत्यंत्यो मदविह्वलं लयविसंवादेषु पौरांगनाः
क्रीडामौरजिकस्वकांतवदनान्यालोकयंति स्मिताः ॥ [२१ ॥*]

राज्ञी [।*] कर्णं दत्वा(त्त्वा)। सोल्लासं। अज्जउत्त[1] एदं पि आयण्णेहि (।) समयसुहावयं हिंदोलयं। राजा। प्रिये [।*] किमुच्यते। अंस(श)न्यास-ग्रह-कृत-पदं ता-†

22 डितं मंद्रभूमौ
षज्जं(ड्जं) तन्वन्ऋ(न्नृ)षभ-रहितं धैवतेनापि हीनं।
हिंदोलाख्यः सुखयति दधन्मध्यमं तारदेशे
कंपं वि(बि)भ्रत्किमपि रुचिरं षड्जके पंचमे च ॥ [२२ ॥*]

विदू। वयस्स [।*][2] जाणिदं मए वि। एसो सो हिंदोलओ (।) जहिं हिंदोलय-चउत्थीए इत्थीउ कीलंति। राजा। स्मितमभिनीय। सोपहासं। नूनमभिज्ञो भवान् ग्राम-†

23 रागेषु। विदू। सदर्पं। कधं गेयं न जाणामि।[3] जदा मे वं(ब)भणी व(ब)हु-वियड-दंत-सुंदरं मुहं पसारिय मंगलाइं गाएदि तदा हं गोरि-गेयगहिल्लो हरिणो व्व पाणे दाउमिच्छामि ॥ इति विदूषकं विहाय सर्वे हसंति। राजा। स्मित्वा [।*] सखे। एतावता गीते सम्यगभिज्ञो भवान्। कनकलेखा अंचलपिहितां सिंदूरमुष्टिं राज्ञी-

24 हस्ते [ऽ+] पर्यति। राज्ञी गृहीत्वा स्मितमभिनीय च (।) राज्ञो मस्तक-मुद्धूलयितुं मुष्टिमुत्क्षिपति। राजा। शिरो नमयन् सस्मितं।

सिंदूरोद्धूलनायैष मूर्द्धा नम्रीकृतो मया।
एष एव प्रणामश्च तन्निषेधाय दर्शितः ॥[२३॥*]

राज्ञी [।] सलीलस्मितं (।) सख्याः सिंदूरमर्पयति। कनकलेखा-विदूषकौ परस्परं सिंदूरोद्धूलनं नाटयतः। विदू ॥

25 कस्तूरीक्षोदमर्पयन्। वयस्स[4] [।*] तुमं पि देविं भरेहि। राज्ञी (।)

---

(१) आर्यपुत्र। एतमप्याकर्णय समयसुखावहं हिन्दोलकम्।

(२) वयस्स। ज्ञातं मयापि। एष स हिन्दोलको यत्र हिन्दोलक-चतुर्थ्यां स्त्रियः क्रीडन्ति।

(३) कथं गेयं न जानामि। यदा मे ब्राह्मणी बहु-विकट-दन्त-सुन्दरं मुखं प्रसार्य मंगलानि गायते तदाऽहं गोधेरगृहीत हरिण इव प्राणान्दातु-मिच्छामि।

(४) वयस्य। त्वमपि देव्यायर्पयस्व।(lit. देवीं भर)

---

† Expressed by a symbol.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशृंखल–चरणारविंदमपसरति। राजा।

देवि त्वन्मुखमुल्लसत्परिमलं स्मेरारविंदभ्रमा-
द्भृंगाणामुपसेदुषां प्रतिमया स्निग्धेंद्रनीलत्विषां।
संज्ञाते मृगनाभिपत्र–मकरी–शृंगार–लीलायिते
चेतोहारि करोति कः पुनरिदं कस्तूरिकापंकिलं। [। २४ ॥*]

उपसृत्य (।) ललाः–

26 [ट*]स्वेदमुत्पुंसयन्। अलं संभ्रमेण [।*] अपनीयतां श्रमः। इदानीं हि।

संभोगोत्कलिं(लि)का–मिलत्सहचरी–शृंगावमर्शद्रव-
त्कस्तूरीमृग–मीलितेक्षण–झरत्तोषाश्रुमिश्रोद्गमः।
गीतैकांत–निषण्ण–किन्नरवधू–कंदर्पकेलि–क्लम-
स्वेदच्छेद–विचक्षणो विचरति श्रीखंड–शैलानिलः। [। २५॥*]

विदू। वयस्स।[१] जदि तुमं एदाए दासीधूआए क–

27 [ण*]यलेहाए सह मम पाणिग्गहणं करावेसि (।) तदा अहं पि तुमं व नायरिय–नारीसहिदो वसंतूसवं माणेमि। राजा (।) राज्ञी च स्मयेते। कनक। सनासा–संकोचं विचिकित्सते। राज्ञी [।*] स्मृतिमभिनीय। अज्ज-उत्त [।*][२] पाणिग्गहण–वयणेण संभराविदम्हि। मए माहवी–लदाए सहयारस्स पाणिग्गहो कारिदव्वो [।*] तुम्हे वि तहिं–†

28 [णि*]मंतिदा चिट्ठध। ता दाणि उवसंभार–संपादण–कज्जणा उज्जाणं गमिस्सं। राजा। यदभिरुचितं देव्यै। इति सख्या सह राज्ञी निःक्रांता (निष्क्रान्ता)। राजा। सखे। क्व सा नवफलिका पारिजातमंजरी। न, न,

---

(१) वयस्य। यदि त्वमेतया दासीदुहित्रा कनकलेखया सह मम पाणिग्रहणं कारयिष्यसि(lit. कारयसि) तदाऽहमपि त्वमिव नागरिक-नारी–सहितो वसंतोत्सवं मानयिष्यामि। (lit. मानयामि। as per the Prākrit usage).

(२) आर्यपुत्र। पाणिग्रहणवचनेन स्मारितास्मि। मया माधवी-लतया सहकारस्य पाणिग्रहः कारयितव्यः युवामपि तत्र निमन्त्रितौ तिष्ठथः। तदिदानीमुपसंभारसंपादनकार्येणोद्यानं गमिष्यामि।

---

† Expressed by a symbol, wrongly given.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विस्मृतं [।*] सहकार-मंजरी। विदू। सस्मितं [।*] वयस्स। ण खु एदं विंभरणं[1]। संभरणं जेव एदं। इति सहकारमंजरीं समर्पयति। रा—

29. [जा*]। गृहीत्वा (।) सकरुणमात्मगतं।

परिम्लानामिमां दृष्ट्वा नूतनां चूतमंजरीं।
स्मरामि विरहक्लांतामंतःप्राणेश्वरीं नवां ॥ ६२ ॥ [*]

इति तादात्म्यमभिनीय शून्यमवलोकते। विदू। वयस्स[2]। मन्ने पारिआय-मंजरी-सणाहं पि दे सुन्नं हिययं। राजा। सखे किमुच्यते। रागं सांध्यमिवा(वो)-द्वहत्यविरलं शून्यत्वमासेदुषि प्रोन्मीलन्नव-विप्रयो—*

30 [ग-*][त]मसि व्योम्नीव सा मे हृदि। वा(वा)ला चांद्रमसी कलेव वसति स्तोतव्य-नव्योदया पंचेषोर्जयिनः प्रतापमसमं साक्षाद्धि-धत्ते[ऽ*]पि च ॥ [२७ ॥*] नेपथ्ये। सुहयारिणी भोदु मज्झन्न-संझा देवस्स[3]।

तिसियाण काणणेसुं तुह रिउ-रमणीण विंब(विंब)ण-निहेण।
वयणाइं हारमुत्तासु सलिलकज्जेण व विसंति।[। २८ ॥*]

विदू। वयस्स[4] [।*]

देवेणाहवनिज्जिदाण

31 सहसा वंदीकदंतेउरं
दिंतेणं समिदा विओय-वियणा जाणं वसंतुग्गमे।

---

(१) वयस्य। न खल्वेतद् विस्मरणम्। संस्मरणमेवैतद्।

(२) वयस्स। मन्ये पारिजात-सनाथमपि ते शून्यं हृदयम्।

(३) सुखकारिणी भवतु मध्याह्न-संध्या देवस्य। तृषितानां काननेषु तव रिपु-रमणीनां बिम्बनिभेन। वदनानि हारमुक्तासु सलिलकार्येणेव विशन्ति ॥ २८ ॥

(४) वयस्स। देवेनाहवनिर्जितानां सहसा बन्दीकृतान्तःपुरं
ददता शमिता वियोग-वेदना येषां वसन्तोद्गमे।
एते ते नत्वा पादयुगलं दण्ड-प्रमाणेन ते
पत्तिच्छत्रभरेण भूमिपतयो व्रजन्ति वासालयम् ॥२९॥

तत्किमिह स्थितेन। एहि। धारागिरि-लीलोद्यानमेव गच्छावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एदे ते णमिऊण पायजुवलं दंडप्पणामेण दे
पत्तिच्छत्त-भरेण भूमिवइणो वच्चंति वासालयं ॥ [२९ ॥]

ता किं इध ट्ठिदेण। एहि धारागिरि-लीलोज्जाणं जेव गच्छामो। राजा। सप्रत्याशं सोत्कंठं च। यदभिरुचितं वयस्यायेति निःक्रांतौ (निष्क्रान्तौ)। वसंतोत्सवो नाम

32 प्रथमोङ्कः[1] ॥ ० ॥

---

(१) In lines 32, 36, 47 etc., थ is written like व्व, and so, is read as व्व by Dr. Hultzsch, and then corrected to थ, except in l. 47.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्री [:*] ॥ प्रविश्य कुसुमाकरः।

देव्या समस्त-कलया मलयानिलेन
चूतातिमुक्तकलता-मिथुनोत्सवेन।
वारांगना-मसृण-मंगल-गीत-रं(रा)गै-
र्द्धा(र्धा)रागिरिः कमपि सम्मदमातनोति ॥ [३० ॥*]

अद्यैव च।

मत्तानां मलयानिलैर्विटपिनां यूनां स्मितश्रीमतां
संव(ब)न्धोचितनर्मणामिव व(ब)लादाकृष्ट-केशांशुकान्।
भ्रूभंगेन विवृ-
33 [त्य] पल्लवकरान् रोमांचितान्कोरकै-
रस्पं(स्यं)त्याकुल-पाणि-कंकण-झणत्कारेण वारांगनाः॥ [३१॥*]

केवलं वत्सा पारिजातमंजरी राजदर्शनोत्कलिका-परंपराभिरुत्ता-म्यंती मर्मणि व्यथयति। सा हि ॥

सायं कोक-वियोग-दर्शन-दलन्मर्मेक्षणा पक्षिणः
किं नोड्डीय मिलंत्यमी द्रुतमिति क्लांता मुहुः पृच्छति ॥
सीता-राम-कथासु कंपित-कुचास्वा(श्वा)-
34 [से]न शून्योद्गमं
हुंकारं ददती करोति करुणाविस्मारितार्थां सखीं ॥ [३२ ॥*]

किं व(ब)हुना।

तन्वी तापातिरेकेन धत्ते यस्माद्विहस्ततां।
प्रवालहस्तै रुंधन्ति तस्यैंदोरातपं लताः ॥ [३२ ॥*]

नेपथ्यावलोकितकेन। कथं प्रिया मे वसंतलीला ॥ सप्रणयादरं। प्रिये [।*] अयमहमि(म्। इ)त इतो भवती। निर्वर्ण्य। नूनमिदानीं।

ऋजु-श्लथ-भुजेनाधो-हस्तेनाकाशले-
35 [खि]नी।
नताननां मंदगतिस्तर्चितामेव गाहते ॥ [३४ ॥*]

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

ततः प्रविशति यथानिर्दिष्टा वसंतलीला। कुसुमाकरः। उपसृत्य। प्रिये [।*] कथमास्ते वत्सा पारिजातमंजरी। वसंत।

उत्तुंगे थण-मंडलस्स सिहरे ओट्ठ-प्पवालप्पहा-
पुंजं कुंजरगामिणी वहदि सा चिंता-नमंताणणा।[1]
अंतो नीहरिऊण सास-लहरी-सत्थेण पज्जूसुअं
दूरारोह-निहालि—
36 [अ*][प्पि]ययमं रत्तं व चित्तं नियं॥ [३५॥*]

कुसुमा। सकरुणचिंतावात्सत्यं[2]॥ प्रिये [।*] तत्किमर्थमागतासि तामेकाकिनीं वा(वा)लां विहाय। वसंत। रायागमणपउत्तिं उवलंभिदुं।[3] कुसुमा। प्रिये [।*] साधूक्तं। कथितं हि मे राज्ञो नर्मसुहृदा विदग्धेन यथा[ऽ*]द्य माधवी-सहकार-विवाहारंभ-दर्शनापदेशेन देवो धारागिरि-लीलोद्यानमागत्य युद्धांत-शुद्धांत-क्ष—

37 [ण*-]सहचारिणीं प्राणेश्वरीमवश्यमेकांते संभावयिष्यतीति। वसंत। आश्वसिति। कुसुमा। प्रिये। एवं च कथितं।

देवः परिजनस्योक्तीरज्ञातार्थो[ऽ*]पि चिंतया।
अभ्युपैति कथांताय शून्यं कंपितमस्तकः॥ [३६॥*]

किंतु।

नो संभावयति प्रसाद-विभवैर्भृत्यांश्चकोरान्निजा-
नुल्लासं निदधाति नो कुवलये नो वाहिनी-भर्त्तरि।
राजा सर्वकला-
38
[श्रि]तो[ऽ*]पि दिवसप्राये वियोगे प्रियां

---

(१) उत्तुङ्गे स्तन-मण्डलस्य शिखर ओष्ठ-प्रवाल-प्रभा-
पुञ्जं कुञ्जर-गामिनी वहति सा चिन्तानमदानना।
अन्तर्निर्हृत्य श्वासलहरी-सार्थेन पर्युत्सुकं
दूरारोह-निभालित-प्रियतमं रक्तमिव चित्तं निजम्॥

2. Here, as also in lines 37, 46, 55, 57, and 74, the letter य in the end of a ligature is written like प. Dr. Hultzsch reads it as प and then corrects it to य.

(३) राजागमनप्रवृत्तिमुपलब्धुम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तामेव क्षणदामभीप्सति नवामापांडिमानं गतः ॥ [३७ ॥*]
तदमुना संविधानकेन त्वया सविशेषमाश्वास्य परितोषणीया वत्सा पारिजातमंजरी। यतः।

विरहे नूनमेकस्य दुःखेन लभते सुखं।
सुखेन चेतरो दुःखं प्रेम्णो हि कुटिला गतिः ॥ [३८ ॥*]

वसंत। जं आणवेदि पिअयमो[१]। कुसुमा। अहमपि ए(प्ये)तत्का—

39 र्यानुरूपस्याभिप्रायज्ञापनाय विदग्ध-द्वितीयस्य राज्ञः सकाशमेव गच्छामीति निःक्रांतौ (निष्क्रान्तौ) ॥ विष्कंभकः ॥† ततः प्रविशति राजा विदूषकश्च। राजा। समंतादुद्यानमालोक्य। सखे।

तस्या एव मुखेन निर्मल-निज-ज्योत्स्नाभिराप्यायिताः
शंके [ऽ*]मी तरवो मनोज्ञमसृणच्छायाभिरायामिनः।
सौरभ्यं कुसुमोत्करेण दधतस्तस्यैव सं-
40 स्कारजं
झंपा-लंपटमाह्वयंति मधुलिट्संतानमुच्चैस्तरां(राम्) ॥ [३९॥*]

(१) यदाज्ञापयति प्रियतमः।

† Cf. अभिनवगुप्तः—' विष्कभयत्युपस्तम्भयतीति विष्कम्भकः।'
नाट्यदर्पण-विवरणे—'विष्कम्भनात्यनुसंधानेन वृत्तमुपष्टम्भयतीति।'
कोहलः—' मध्यम—पुरुषनियोज्यो नाटकमुखसन्धिमात्रसंचारः।
विष्कम्भको हि कार्यो नाटकयोगे प्रयोगकवत् ॥ '
दशरूपके—' वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥
साहित्यदर्पणे—' वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः।
शुद्धः स्यात्, स तु संकीर्णो नीच-मध्यम-कल्पितः ॥'
Since the characters speak here both Sanskrit and Prakrit, this is to be identified as *Miśra-vishkambhaka*.
' अङ्कानर्हस्य वृत्तस्य त्रिकालस्यानुरञ्जिना।
संक्षिप्य संस्कृतेनोक्तिरङ्कादौ मध्यमैर्जनैः ॥
शुद्धो विष्कम्भकस्तत्र संकीर्णो नीचमध्यमैः। ' — नाट्यदर्पणे.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

विदू। वयस्स[1] [।*] जुत्तमणुमाणं ते। जदो वणस्सईणं चंदो राया। राजा। दक्षिणाक्षिस्पंदनं सूचयित्वा (।) सपत्याशमुत्कंठते। नेपथ्ये (।) मंगलध्वनिः। राजा। आकर्णितकेन। सखे।

मध्यादुद्धृत्य तारं स्पृशदलघुकुचाकंपकृष्टेन यासां
श्वासेनैवावरूढं व्रजति यतिविदां सप्तकं रक्ति-

41 [मे]व।

ताभिर्ग्राम्यो[ऽ*]पि गीतध्वनिरयमधुना माधवी मंगलार्थं
वारस्त्रीभिः प्रयुक्तो गमयति गमकैर्नागरत्वं मनोज्ञैः ॥[४० ॥*]

तदेहि [।*] देवीं प्रत्युपसर्पाव इति (वः। इति) परिक्रामतः। विदू। वयस्स[2]। जधा एस समकालुक्कंठिद-केलि-दीहिआ-कलहंस-कूइद-करंवि(वि)दो असमंजभ(स)-मंजीर-कलयलो जधा यथो उम्हायमाण-कप्पूर-परिमलुग्मीसिदो किलं-

42 [त]-कुसुमामोओ पच्चासन्नो हवदि तधा थणमहंपढमिया मिलंतीहिं वियडनियंवो(बो)रुभरपरिक्ख[3]लंत-चलणारविंदाहिं दाहिणा-निलंदोलिरवसंतमालामणहराहिं थोरथणमंडलुव्वहणपरिस्स[म-स]सिद-मंदपच्चायमाणतम्मोलरसाहिं वारविलासिणीहिं सेविज्जंती अब्भु(ब्भु)-ट्ठिदा देवी। राजा। निर्वर्ण्य। सखे[।*] किमुच्यते। वारांगना-मुख-†

43 [ज्यो]त्स्नालंघनोत्कंधरद्युतिः। देवी दुग्धार्णवे लक्ष्मीरुल्लसंतीव लक्ष्यते ॥ [४१ ॥*] ततः प्रविशति यथानिर्दिष्टा राज्ञी। विदू। वयस्स

---

(१) वयस्य। युक्तमनुमानं ते। यतो वनस्पतीनां चन्द्रो राजा।

(२) वयस्य। यथैष समकालोत्कण्ठित-केलि-दीर्घिकाकलहंस-कूजित-करम्बितोऽसमञ्जस-मञ्जीर-कलकलो यथा च स्तोकोष्मायमाण-कर्पूर-परिमलोन्मिश्रितः क्लान्त-कुसुमामोदः प्रत्यासन्नो भवति तथा स्तनाहंप्रथमिकया मिलन्तीभिर्विकट-नितम्बोरुभर-परिस्खलच्चरणा-रविन्दाभिर्दक्षिणानिलान्दोलनशील-वसन्त-माला-मनोहराभिः स्थूल-स्तन-मण्डलोद्वहन-परिश्रम-श्वसित-मन्द-प्रत्याय्यमान-ताम्बूल-रसा-भिर्वारविलासिनीभिः सेव्यमानाऽभ्युत्थिता देवी।

(३) This ligature is written differently in line 45.

---

† Expressed by a symbol.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

[।*] इदो वि पेच्छ [।*][1] जधा एस कुसुमायरो मम सम्मुहं सन्नं करेदि तथा अ[संसयं] पारिआयमंजरिं वसंतलीलाए सह इध ज्जेव संचारइस्सदि। राजा। निर्वर्ण्य (।) किंचिदाश्वस्य च।

क्लान्तो विरहदावेन तामेव प्रति–

44 [धा]वति।

अंतःकरणपक्षी मे लावण्यामृतवाहिनीं ॥ [४२ ॥]

ततः प्रविशति विटपांतरिता पारिजातमंजरी वसंतलीला च। राज्ञी [।*] उपसृत्य राजानमवलोक्य स्मितेन संभाव्यति। विदू [।*] ससंभ्रमं। अहो अरिट्ठमरिट्ठं।[2]

चूओ चंपयकुसुमेहिं चंपओ पाडलापसूणेहिं।
वउलो सिरीसउप्फेहिं वियसिओ हंत अच्चरियं ॥[४३॥*]

राजा। सस्मितं। धिङ्मूर्ख [।*] नेदमरिट्ठं [।*] किंतु देव्या[ऽ*] यमस्माक–

45 [मा]चार्यकेण चित्रप्रयोगो नाम वृक्षायुर्वेदभेदः प्रदर्शितः। कनकलेखा। विहस्य [।*] भट्टा [।*] ण खु एसो वियक्खणत्तणेण वियट्ढो (ड्ढो) [।*] किंतु विसेसेण दड्ढा(ड्ढा)त्ति।[3] इति सर्वे हसंति। नायिका। राजानं सस्पृहमवलोक्य। अपवारितवेन [।*]† अज्जे [।*][4] अन्नपायवे अन्नकुसुमेहिं वियसाविदुं अत्थि मे कोदुहल्लं। वसंत। वच्छे [।*][5] एसो ज्जेव राया तुह उवज्झाओ हविस्सदि। नायिका॥

---

(१) वयस्य। इतोऽपि प्रेक्षस्व। यथैष कुसुमाकरो मम संमुखं संज्ञां करोति तथाऽसंशयं पारिजातमञ्जरीं वसन्तलीलया सहेहैव संचारयिष्यति।

(२) अहो अरिष्टमरिष्टम्।
चूतश्चम्पककुसुमैश्चम्पकः पाटलाप्रसूनैः।
बकुलः शिरीषपुष्पैर्विकसितो हन्ताश्चर्यम्॥

(३) भर्तः। न खल्वेष विचक्षणत्वेन विदग्धः। किंतु विशेषेण दग्ध इति।

(४) आर्ये। अन्यपादपानन्यकुसुमैर्विकासयितुमस्ति मे कौतूहलम्।

(५) वत्से। एष एव राजा तवोपाध्यायो भविष्यति।

---

† "तद्भवेदपवारितम्। रहस्यं तु यदन्यस्य परावृत्य प्रकाश्यते"
—साहित्यदर्पण.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

46 [उ]ष्णं निश्च(निःश्व)स्य। सवितर्कमात्मगतं। कत्तो (कुतो) अम्हाणं तारिसा भायधेया।[1] राज्ञी। अज्जउत्त[2]। एदं तं माहवी-सहयार-मिहुणं। राजा। देवि [।*] साधु दर्शितं।

पूर्वामुखालंकृतयोर्माधवी-सहकारयोः।
कापि वैवाहिकी लक्ष्मीरियमाह्लादतेतरां॥ [४४॥*]

किं च।

धन्यो[ऽ*]यं सहकारसुंदरयुवा चैत्रानिलांदोलनै-
रुद्युक्तः परिरिप्सते प्रियतमो वामांगविश्रंभिणीं।
एषाप्यर्द्धसुवासिनी नवलता

47 [न]म्रीभवंती भृशं
निर्वे(र्वे)धेन पराङ्मुखी न सहते वैयात्यवार्तामपि॥ [४५॥]

वसंत। नायिकां प्रति। अथो एवं जेव तुम्हारिसीओ मुद्धाओ दूरे गाढुक्कंठिरीओ पियसयासे परंमुहीओ हवंति।[3] नायिका। किंचिद्विहस्य। सासूयमिव। अज्जे [।*][4] तं अन्नं जेव किंपि जंपन्ती चिट्ठसि। अहं उण एत्तिगं जेव भणामि जं अन्नपायवे अन्नकुसुमेहिं वियसाविदुं अत्थि मे कोदुहल्लं। वसंत। स्वगतं। देवी

48 [जा]व उत्तरामुहट्ठिदा माहवी-सहयार-मिहुणं अणुरायभिभला भत्तुणो पच्छिमामुहट्ठिदस्य दंसयंती चिट्ठदि (।) ता मुहुत्तं पारिजाय-मंजरिं पायडं करेमि (।) जधा देवीए कहिं पि आहरणे पडिविंबि(बिंबि)दं पेच्छदि णं राया[5]। इति विटप-पल्लवानपसार्य नायिकां प्रकटीकरोति। राजा।

---

(१) कुतोऽस्माकं तादृशानि भागधेयानि।

(२) आर्यपुत्र। एतत्तन्माधवी-सहकार-मिथुनम्।

(३) अथैवमेव युष्मादृश्यो मुग्धा दूरे गाढोत्कण्ठाः प्रियसकाशे पराङ्मुख्यो भवन्ति।

(४) आर्ये। त्वमन्यदेव किमपि जल्पन्ती तिष्ठसि। अहं पुनरेतावदेव भणामि यदन्य-पादपानन्यकुसुमैर्विकासयितुमस्ति मे कौतूहलम्।

(५) देवी यावदुत्तराभिमुखस्थिता माधवी-सहकार-मिथुनमनुराग-विह्वला भर्तुः पश्चिमाभिमुखस्थितस्य दर्शयन्ती तिष्ठति तावन्मुहूर्तं पारिजातमञ्जरीं प्रकटां करोमि यथा देव्याः कस्मिन्नप्याभरणे प्रतिबिम्बितां प्रेक्षत एनां राजा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राज्ञीताडं(टं)के प्रतिविंवि(विंबि)तां नायिकामवलोक्य। सहर्षावहित्थमात्मगतं। **अये जितं मनोरथैः।**

49 [य]दियं व(व)लधूलिग्घोरांधकार-दुःसंचर-समर-संकेत-नवाभिसारिका मे प्राणेश्वरी प्रथमप्राणेश्वरी-ताडं(टं)कदर्पणे लोचन-गोचरं गता। सवितर्कात्मु(ड्ड)तं च। नूनमियमस्मान् पश्चिमेन विटपांतरे वसंतलीलया केनचिदुल्लेखलंपाकेन वचसा नर्ममर्मणि स्पृष्टा सस्मितमसूयते।

सद्यः साध्वस-धूसरेण विकसद्वैलक्ष्य-लक्ष्मी-स्पृशा-
कर्णांतालस-दृष्टिना[ऽ*]धर-पुटोद्भिन्नस्मि-
50 [त]श्रीमता।
[श्ल]क्ष्णेर्ष्याभिनय-भ्रुकुंस-भृकुटी-सौभाग्य-शृंगारिणा
तन्वीयं वदनेंदुना मम दृशोर्दत्ते सुधाचर्वणां॥ [४६॥*]

सकरुणानुरागं च।

प्रतिविंव(विंब)मिषादेषा स्वयं दौत्यमुपागता।
अत्यंतदुर्व(र्व)लैरंगैर्व्रू(र्व्रू)ते विरहदुर्दशां॥ [४७॥*]

इति कोमलांगुलिग्रहेण कर्णं धृत्वा सा(स)विलासमवलोकयति। **राज्ञी।** सरोमांचमवनतमुखी स्पर्शसुखानुभवं नाटयति। **वसंत।** ताडं(टं)के नायि-

51 [का]प्रतिविंवं(विंबं) निर्वर्ण्य राज्ञश्चेष्टया चित्तोपलक्षितकेन। अपवार्य साकूतं। **वच्छे [।*]**[1] **पेच्छ देवीए ताडंकस्स रामणिज्जयं (।) जं राया सावहित्थमेक्क-दिट्ठीए पेच्छंतो चिट्ठदि। नायिका।** राज्ञी-ताडं(टं)के स्वप्रतिविंवं(विंबं) राजानं च निर्वर्ण्य (।) सवितर्कप्रत्याशमात्मगतं। **अम्महे [।*]**[2] **किं एसो राया मे पडिविंवं(विंबं) पेच्छदि (।) आदु देवीए ताडंकं जेव। ता दाव अमय-कालऊडाण(णं) अंत-**

52 [रा]ले दोलाइदम्हि। इति चिंतां नाटयति। **वसंत।** नायिकायाश्चित्त-

---

(१) वत्से। प्रेक्षस्व देव्यास्ताटङ्कस्य रामणीयकं यद्राजा सावहित्थमेकदृष्ट्या प्रेक्षमाणस्तिष्ठति।

(२) हंहो। किमेष राजा मे प्रतिबिम्बं प्रेक्षतेऽथवा देव्यास्ताटङ्कमेव। तत्तावदमृतकालकूटयोरन्तराले दोलायिताऽस्मि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुपलक्ष्य। वच्छे [।*][1] मा अन्नहा मन्नेहि।

देवीए ताडंके कण्णाहरणाहिदेवयं व तुमं।

संकाणुरायनिहुओ पेच्छइ पडिविंवि(बिंबि)यं राया॥ [४८॥*]

जइ उण न पत्तियसि ता खणद्धं तुमं पल्लवंतरिदं करेमि जधा पडिविंव(विंव)सुण्णं ताडंकं पेच्छंतस्स केरिसी दिट्ठी भत्तुणो भोदि त्ति जाणासि। इति नायिकां पुनः पल्लवांत-

53 [रि]तां करोति। राजा। सखेदावाहित्थं शून्यदृष्टिरालोकते। वसंत। वच्छे [।*][2] पेच्छ २।

ताडंके तुह पडिअं अणियंती झत्ति भत्तुणो दिट्ठी।

विम्भरियनिहाणट्ठाण व्व सुन्नपज्जाउला जाया॥ [४९॥*]

राजा। सावेगं पृष्ठतो[ऽ*]वलोकते। साह्लादमात्मगतं।

येनायोधनदर्शनोत्सवजुषां वैमानिकीनां मुखा-

न्यव्जा(ब्जा)नीव निशाकरेण गगने नीतानि विच्छायतां।

भूयो दृष्ट-

54 [मि*] [दं] तदेव सुतनोः स्मेरं किमप्याननं

विच्छेदातप-लीढलोचन-सुधा-निष्यंदि-चंद्रातपं॥ [५०॥*]

नायिका। ससाध्वसं राजानमपांगेनावलोक्य (।) लज्जया[ऽ]पसर्त्तु(र्तु)मिच्छंती परिक्रामति। वसंत। तां रुण[द्धि]। राजा। निर्वर्ण्य सस्पृहमात्मगतं।

उच्छ्वासि स्तनयोर्द्वयं तदपि यत्सीमाविवादोल्व(ल्ब)णं

लीलोल्लेखि गतं तदप्यनुपमं श्रोणिश्रिया मंथरं।

दीर्घं दृग्युगलं तद-

55 [प्यनु]गतं लास्येन किंचिद्भ्रुवो

रेतस्यास्तनुमध्यमं विजयते सौभाग्यवी(बी)जं वयः॥ [५१॥*

---

(१) वत्से। माऽन्यथा मन्यस्व।

देव्यास्ताटङ्के कर्णाभरणाधिदेवतामिव त्वाम्।

शङ्कानुरागनिभृतः प्रेक्षते प्रतिबिम्बितां राजा॥

यदि पुनर्न प्रत्येषि तत्क्षणार्धं त्वां पल्लवान्तरितां करोमि, यथा प्रतिबिम्बशून्यं ताटङ्कं प्रेक्षमाणस्य कीदृशी दृष्टिर्भर्तुर्भवतीति ज्ञास्यसि।

(२) वत्से। प्रेक्षस्व प्रेक्षस्व।

ताटङ्के तव प्रतिमामपश्यन्ती झटिति भर्तुर्दृष्टिः।

विस्मृत-निधान-स्थानेव शून्यपर्याकुला जाता॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सखी–विदूषकौ विदित-राज–नायिका–वृत्तांतौ परस्परं साकूतमवलोकयतः । राजा स्मृतिमभिनीय (।) सातंकं (।) पुनस्तथैव ताडं(टं)कमवलोकयति । सविमर्श–पक्षपातमहह (पातम् । अहह) । **अज्ञातदोषा ताडं(टं)कं मद्दृष्ट्यालिंगितं प्रिया । धत्ते निश्चलमा(म)द्यापि प्रीत्या मदनुवृत्तये ॥ [५२ ॥*] राज्ञी ।** द—

56 [क्षि]णाक्षिस्पंदितकेन । अधृतिमभिनीय सोद्वेगमुन्मुखी सखी–मुखमीक्षते । तच्चेष्टां परिकलय्य (।) सासूयवितर्कमात्मगतं । **अथो कुदो उण से हदासाए अज्ज वियट्टसंमुही सवियारा दिट्ठी ।**[१] सविमर्शमात्मगतं । **पडिहाइ अज्जउत्तो स[ब्भा(ब्भा)]वसिणेह-सुंदर-सहावो ।**[२] **असुहं पि व कहइ पुणो दाहिणनयणं फुरंतं मे ॥ [५३ ॥*] कनक ।** राज्ञी सवि(वै)–†

57 [ल]क्ष्यस्मितमीक्षते । **राज्ञी ।** औत्सुक्यमभिनीय । **सहि [।*] किं तए हसिदं ।**[३] **कनक ।** सवि(वै)लक्ष्यं जोषमास्ते । **राजा ।** विदूषकं प्रतिअ(त्य)पवारितकेन । **सखे । नूनमनया दासीपुत्र्या दानसंमानपूर्व्वं चिरनिवारितया–[ऽ*]प्यद्य सर्वं प्रकाशिष्यते । विदू ।** अपवार्य । **अध इं ।**[४] **राजा ।** दृष्टिसंज्ञया कनकलेखां प्रसादयति । **राज्ञी ।** राजचेष्टां परिकलय्य तं भ्रूभंगेन त–

58 [र्ज]यंती कनकलेखां वा(वा)हौ धृत्वा सावहेलं परिक्रम्य निःक्रा(निष्क्रा)–मति । **नायिका ।** सर्वेषां चेष्टाः परिकलय्य सदैन्यमात्मगतं । राजानं प्रति ।

चंदस्स व तुह मेहंतरम्मि खणदंसणेण जा सासिया ।[५]
सीयामि सा चओरि व्व पुण वि तइ अंतरिज्जंते ॥

[५४ ॥] प्रकाशं । अज्जे [।*][६] **नूणं देविं पसादिदुं गमिस्सदि राया । ता**

---

(१) अथ कुतः पुनरस्या हताशाया अद्य विसंवाद-संमुखी सविकारा दृष्टिः ।

(२) प्रतिभात्यार्यपुत्रः सद्भाव-स्नेह-सुन्दर-स्वभावः ।
असुखमपीव कथयति पुनर्दक्षिणनयनं स्फुरन्मे ॥

(३) सखि । किं त्वया हसितम् ।

(४) अथ किम् ।

(५) चन्द्रस्येव तव मेघान्तरे क्षणदर्शनेन या सस्मिता ।
सीदामि सा चकोरीव पुनरपि त्वय्यन्तरीयमाणे ॥

(६) आर्ये । नूनं देवीं प्रसादयितुं गमिष्यति राजा । तदेहि । गच्छावः ।

---

† Expressed by a symbol.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एहि [।*] गच्छम्ह [।*] इति निःक्रां(निष्क्रां)ते। राजा। सप्रत्याशं पृष्ठतो[ऽ*] वलोक्य

59 [ना]यिकामदृष्ट्वा विदूषकं प्रति सवैलक्ष्यं [।*] सखे [।] दृष्टं त्वया यन्ममापतितं।

अपि सर्वकला देवी यदर्थे[ऽ*]भूत्पराङ्मुखी।
सा[ऽ*]पि जाता दृशोर्दूरे विजयश्रीः प्रिया मम ॥[५५॥*]

तत्किमत्र कर्त्तव्यं। विदू। वयस्स [।*][1] मारिदस्स भुंजिदस्स य एक्कं जेव णामं। थोओ व(ब)हू वा अवराहो अवराहो ज्जेव। ता संभावेहि महाभाइणिं पारिआयमंजरिं। राजा। सोत्कंठं। सखे [।*] एवं करोमि। इ—

60 [ति] परिक्रामतः। विदू। वयस्स [।*][2] पेच्छ एदं तं रविरहतुरंगमकंति-सच्छायं मरगय-मंडवं। राजा। दक्षिणभुजस्पंदनं सूचयित्वा (।) सप्रत्याशं। सखे [।*] साधु दर्शितं।

एतच्चेतो हरति पुरतः पार्वती-कांत-कंठ-
[च्छा]या-कांतं मरकत-शिला-मंडपं श्लक्ष्णमक्ष्णोः।
येनोद्वांतैर्द्युतिकिसलयैर्निह्नुतानामलीनां
मालात्मानं खलु विवृणुते मंजुना गुंजितेन ॥ [५६॥*]

इति परिक्रामतः ॥

61 राजा।

तस्या लोलदृशः स्तनौ सहृदयौ सम्यक्प्रमाणोद्धता-
बुद्धर्तुं निजदोषमप्रतिहतावाक्रांतकक्षांतरौ।
संरध्वौ(ब्धे) नवपत्रभंगिरचनारंभेण वादस्थले
माध्यस्थ्ये[ऽ*]पि ययोर्वलित्रयमधस्तस्थौ तनुप्रातिभं ॥ [५७॥*]

इति परिक्रम्योपसृत्य नायिकां पश्यन्सहर्षास्त्रं धृतिनिश्वा(निःश्वा)सं विमुच्य। उपधाय वयस्या[ङ्कं म्लान-त]ल्यो(ल्पो)त्पलांकुरा। वियोगयोगनिद्रायामियमास्ते

---

(१) वयस्य। मारितस्य भुक्तस्य वैकेव गतिः। (lit. चैकमेव नाम।) स्तोकं बहु वाऽपराद्धमपराद्धमेव। (lit. अपराधोऽपराध एव।) तत्सम्भावय महाभागिनीं पारिजातमञ्जरीम्।

(२) वयस्य। प्रेक्षस्व। एतद्रविरथतुरङ्गमकान्तिसच्छायं मरकत-मण्डपम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

62 [प्रि*][या] मम ॥ [५८॥*] तद्भवतु [।*] निर्वर्ण्णयामि तावत्। ततः प्रविशति यथानिर्दिष्टा नायिका सखी च। राजा। स्वगतं। अहह। मुखज्योत्स्नांकुरैरस्याः पीते तमसि मांसले। इंद्रनीलांश[वः] शेषाः परभागं दधत्यमी॥ [५९॥*] सकरुणचमत्कारं। मरकतमयमेदिन्यां भा-[ति] प्रतिविंवि(बिंबि)ता कृशांगीयं। अंतर्जलशयनीयं तापेन निषेवमाणे-व॥ [६०॥*] वसंत। सकरुणमाकाशे॥ छ॥

63 [जीवइ*][आ] वलआइ व मयरद्धय जयसि सन्ह-मज्झाए।[1] तं चिय हंत कुणंतो णिज्जीवं होहिसि कहं व॥ [६१॥*] नायिका। वसंतलीला बा(वा)ष्पार्द्रमवलोक्य सगद्गदं। अज्जे।[2] तस्सिं(जस्सिं) सहाव-सुहए सव्वकला-संगयम्मि दिट्ठे वि। धिप्पेमि ओसही विय सो दूरं दुल्लहो राया। [।६२॥*] राजा। कुसुमान्यवचित्य (।) च्छ(छ)न्नं च्छ(छ)न्नमुपसृत्य तैर्नायिकामेकैकेन प्रहरति। नायिका। स--†

64 [संभ्रमा*]वेगं(।) राजानमवलोक्य। हद्धी।[3] एस णिद्दओ पच्चक्खो ज्जेव कुसुमाउहो मं मन्दभाइणिं पहरेदि। ता परित्तायदु २ अज्जा। इति वसंतलीलामालिंगितुमिच्छंती मूर्च्छति। राजा। सहसोपसृत्य। हा प्रिये पारिजात-मञ्जरि [।*] देहि मे प्रतिवचनं [।*] इति सकरुणं नायिका-हृदय-स्पर्शं नाटयति। वसंत। राजानमवलोक्य। नायिकां वीजयंती साश्वासं

65 [सकरु*][णं] च। वच्छे [।*][4] समस्सस २ [।*] ण खु एसो कुसुमाउहो [।*] तुह हिययवल्लहो खु भट्टो एसो। नायिका संज्ञां लभते। राजा। साश्वासं निर्वर्ण्य। यत्सद्यः-पुटभेद-सालस-लसत्पक्ष्मांचले

---

(१) जीवन्त्या वलयानीव (?) मकरध्वज जयसि सूक्ष्ममध्यया।
तामेव हन्त कुर्वन्निर्जीवां भविष्यसि कथमिव॥ ६१॥

(The rendering of Dr. Hultzsch differs here.)

(२) आर्ये। यस्मिन्स्वभावसुलभे सर्वकलासंगते दृष्टेऽपि। दीपया-म्यौषधिरिव स दूरं दुर्लभो राजा।

(३) हा धिक्। एष निर्दयः प्रत्यक्ष एव कुसुमायुधो मां मन्दभागिनीं प्रहरति। तत् परित्रायतां परित्रायतामार्या।

(४) वत्से। समाश्वसिहि समाश्वसिहि। न खल्वेष कुसुमायुधः। तव हृदयवल्लभः खलु भर्तैषः।

---

† Expressed by a symbol.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुषी सोत्कंपस्तनया प्रसीदति धृति-श्वास-श्रिया यन्मुखं। यच्चायं पुलकः पुरा परिचितस्पर्शोपलंभात्तनौ तेनेयं सुतनुर्व(र्वे)भूव विधुरे जीवार्गला मे हृदि ॥ [६३ ॥*] नायिका (।) राजा–

66 [नमुप*]लभ्य (।) ससाध्वसमुत्थायात्मानं पर्यवस्थापयति। धृतिनिःश्वासमुत्सृज्य(।) वसंतलीलां प्रत्यवापरितकेन। अज्जे [।*][1] अइवल्लहे वि परव्वसे-जणे केरिसो वारंवारमणुवं(वं)धनिव्वं(व्वं)धो। ता एहि [।*] गच्छम्ह। इति राजानं सलज्जाभिमानमपांगेनावलोक्य पराङ्मुखी परिक्रमितुमिच्छति। राजा। सौत्सुक्यं। वा(वा)हौ धृत्वा नायिकां निर्वर्णयन् स्वगतं।

उत्थानं क–

67 [थमप्य*]जायत गतिस्तंभस्तु मामीहते
वैलक्ष्याद्वदनेंदुनैव वलितं दृष्टिस्तु सार्द्रा मयि।
अंगान्येव पराङ्मुखानि पुलको मत्पक्षपाती पुन-
र्मान-प्राथम-कल्पिकी मृगदृशश्चेष्टैव चित्रीयते ॥ [६४ ॥*]

अपि च।

तल्पेंदीवरमुद्राभिरंकितानि मृगीदृशः।
सुरभिस्वेदविं(विं)दूनि मदयंत्यंगकानि मां ॥ [६५ ॥*]

सस्पृहातिरेकं। उत्थानं जघनेन विघ्नितमभूदस्याः क–

68 [रो मंथ*]रो
नीवी-रक्षण-सौविदल्ल-पदवीं वामः प्रकामं गतः।
नीरंगी-सिचयांचलं कुचतटे व(ब)ध्नाति वामेतर-
स्तन्वंग्यास्त्रपयावगुंठितमिदं लीलायितं जृंभते ॥ [६६ ॥*]

प्रकाशं। अयि शशिमुखि [!*] मानं मुंच दृष्टिप्रसादै-
रुपजनय सुभिक्षं स्मेरनीलोत्पलानां।
अपि भवतु भवत्याः कोमलालापभंग्या
झगिति गलितगर्व्वो वल्लकीनां निनादः ॥ [६७ ॥*]

इति प्र–†

69 [ण*]मति। नायिका। हस्ताभ्यां राजानं किरीटेन प्रेरयंती सस्मितम-

(१) आर्ये। अतिवल्लभेऽपि परवशे जने कीदृशो वारंवारमनुबन्ध-निर्बन्धः। तदेहि। गच्छावः।

(Dr. Hultzsch has :—' अयि वल्लभेपि etc.')

† Expressed by a symbol.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पसरति। विदू। मा कहवि कोवि इह देवीए परिअणो संचरेदि।[१] ता आसासेहि कंठग्गहेण तुरियं जेव महाभायं विअयसिरिं। राजा [।*] आलिंग्य (।) मुहूर्त्तमिवानंदमुद्रां नाटयित्वा (।) स्वगतं।

शीघ्रमंतर्मुखैर्भूत्वा विलीनं नवनीतवत्।
करणैः स्पर्शलाभान्मे सुखाद्वैते मनः स्थितं॥ [६८॥*]

70 [अ*]पि च।

उन्मीलत्पुलकांकुरस्तन-तट-स्वेदांबु(बु)-जंबा-(बा)लित-
श्रीखंड-प्रभविष्णु-सौरभ-गुण-ग्राही हठालिंगने।
आनंदाश्रु- तरंग-संगम-चमत्कार-श्रिया शीतलो
विच्छेद-ज्वरमावयोर्द्वृ(र्धृ)तिभवः श्वासानिलः पीतवान्॥[६९॥*]

ततः प्रविशति ताडं(टं)कहस्ता कनकलेखा॥

कनक। सचिंतासंभ्रमं। मए महारायस्स [वअणेन भट्टिणी विप्प-*]।

71 [ल]द्धा ण उण इत्थि त्ति अज्ज जाव भट्टिणी विप्पलद्धा।[२] अज्ज उण देवीए सयं जेव उल्लिहिय सव्वं उवलद्धं। अहं णिमित्तमेत्तं जाद म्हि। अव्वो सामि-णिओअस्स अवस्संकरणिज्जदा [।*] जेण ज्जेव देविं वंचिदुं अव्भ(व्भ)त्थिदा तं जेव महारायं देवीए निओएण उल्लुंठिस्सं। पुरो[ऽ*]वलोक्य। एदं तं मरगयमंडवं।[३] [इ][ति...परिक्रम्य*]

72 राजानमवलोक्य स्वगतं। अम्महे [।*][४] कत्तो आसासो भट्टिणीए (।) जीए वल्लहो अन्नंगणा-णवरंग-सिणेह-वाउरा-णिवडिद-हिअय-हरिणो एवं हिंडदि। उपसृत्य (।) वैल[क्ष्यं] नाटयंती प्रकाशं। जयदु २ भट्टा।[५] सर्वे

---

(१) कुतश्चिदपि कोऽपि देव्याः परिजन इह मा संचरत्। (lit. मा कथमपि कोपीह देव्याः परिजनः संचरतु।) तदाश्वासय कण्ठग्रहेण त्वरितमेव महाभागां विजयश्रियम्।

(२) मया महाराजस्य[वचनेन भट्टिणी विप्र-]लब्धा, न पुनः स्त्रीत्यद्य-यावद् भट्टिनी विप्रलब्धा। अद्य पुनर्देव्या स्वयमेवोल्लिख्य सर्वमुपलब्धम्। अहं निमित्रमात्रं जाताऽस्मि। अहो स्वामिनियोगस्य अवश्यंकरणीयता। येनैव देवीं वञ्चयितुमभ्यर्थिता, तमेव महाराजं देव्या नियोगेनोल्लुण्ठयिष्यामि।

(३) एतत्तन्मरकतमण्डपम्।

(४) हंहो। कुत आश्वासो भट्टिन्या यस्या वल्लभोऽन्याङ्गना-नवरंग--स्नेह-वागुरा-निपतित-हृदय-हरिण एवमटति।

(५) जयतु जयतु भर्ता।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शंकते। राजा। नायिकां पृष्ठतः कृत्वा (।) कनकलेखाहस्ते ताडं(टं)कमवलोक्य (।) स्वगतं। अ[ये] [? प्राक्प्रतिबिंबि(बिंबि)तप्रियांगं ताडं(टं)कमर्पय-*]

73 [न्त्या] देव्या दोषोद्घट्टनेन निपुणमुल्लुंठिताः स्मः। प्रकाशं। भद्रे। अद्य खल्वकारणकुपिता[ऽ*]पि देवी प्रसादनीयेति त्वामेव प्रतिपालयतामस्माकमत्र दिनमतिक्रांतं। त्वत्साहाय(य्य)कसापेक्ष्यं(क्षं) ह्येतत्कार्यं। कनक। सनर्मस्मितं। भट्टा [।*][1] जा एसा अम्हाणं दुदीया भट्टिणी तए पट्ठिं दिंतेण रोसाविदा चिट्ठदि(।) [सा] [जेव तुम्हाणं साहज्जिका हुविस्सदि।*]

74 [रा]जा। स्मित्वा। कनकलेखे [।*] उभयमप्येतत्कार्यं त्वय्येवायतते। तत्किं प्रष्टव्यं भवत्या। कनक। ताडं(टं)कमर्पयति। राजा। गृहीत्वा स्वगतं। कर्णालंकरणं देव्या बिंब(बिंब)स्थानं जयश्रियः। संप्रत्युभयथा[ऽ*]प्येष ताडं(टं)कः प्रतिभाति मे॥ [७०॥*] प्रकाशं। किं पुनः कारणं ताडं(टं)क-प्रेषणे। कनक। एदं कारणं। एस ताडंको[2] अज्ज ग[रु] [ओ संजाओ ति अ-]

75 [न्नं] कण्णाहरअं देवीए धारिदं। अज्ज खु वसंतलीला-विअड्ढ-गोट्ठी-महु-मत्त-सवण-जुअलस्स अहिणव-सोहग्ग-सुंदर-मणहर-कुसुम-मंजरी-रसम्मि[च्छे]ल्ल-छच्चरणचरिदस्स भत्तुणो धारा-गिरि-पमदुज्जाणे जेव सव्वो दिणो अदिक्कंतो। रयणी उण मए विणा कधं गमिस्सदि त्ति विर[ह][व्वथामवणेदुं देवीए एस ताडंको*]

---

(१) भर्तः। यैषाऽस्माकं द्वितीया भट्टिनी त्वया पृष्ठं ददता रोषिता तिष्ठति (सा एव भवतः सहाया भविष्यति)।

(२) एतत्कारणम्। एष ताटङ्कोऽद्य [गुरुकः संजात इत्य(न्यत्)] कर्णाभरणं देव्या धारितम्। अद्य खलु वसंतलीला-विदग्ध-गोष्ठी-मधुमत्त-श्रवण-युगलस्याभिनव-सौभाग्य-सुन्दर-मनोहर-कुसुम-मञ्जरी-रस-मग्न-षट्चरण-चरितस्य भर्तुर्धारागिरिप्रमदोद्यान एव सर्वं दिनमतिक्रान्तम्। रजनी पुनर्मया विना कथं भविष्यतीति विरह[व्यथामपनेतुं देव्या ताटङ्कः प्रे]षितः।

The lacunae in this paragraph are conjecturally filled in by us.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

76 [पे]सिदो। वसंतलीला-विदग्धौ (।) सभयमन्योन्यं पश्यतः। राजा। स्वगतं। अये वक्रोक्ति-परिपाटी-पाटव-ज्ञापनं। यदि वा (।) देवीं सर्वकलामधिकृत्य स्तोकमेतत्। किंतु [।*]

देवी प्रसादनीयेत्येनां मुंचामि कातरां विरहे।
स्वहृदयमयो[ऽ*]स्मि जातो वज्रं तु सुकोमलं हृदयात्॥[७१॥*]

नेपथ्ये।

[अ] [न्यस्याः परिसांत्वनाय महसामीशे दिशो रागि-*][1]

77 णि प्राची कोकिल-मेचकेन तमसा मालिन्यमालंव(ब)ते। या प्रातः परिरंभनिर्भरकरं दोषापलापक्षमं लब्ध्वा(ब्ध्वा) रागिणमेव वक्ष्यति मुखं स्मेरं प्रसादश्रिया॥ [७२॥*] अपि च। विस्फूर्जत्कर-दीपिकांकुर-मरुद्गंधावधूतं जगद्घ्राणप्राणमपक्रमं विदधतः कर्पूरभंगानिलैः। सिंहद्वारि नि[वा][रितारिनिवहैः?*]...[संत*]

78 त-वं(बं)दि-पाठ-तुमुलं तास्यंति शृंगारिणः॥ [७३॥*] किं च।

नासीरचंद्रातपदीपिकाभिः पूर्वाचलेनांतरितो[ऽ*]नुमेयः।
अपींदुरुत्तास्यति राजभावाद्भूमंडलाखंडल सेवितुं त्वां॥ [७४॥*]

नायिका। वसंतलीलां प्रति सकरुणं। तए वि देवीए भएण मंदभाइणी पारिआय मंजरी परिहरिदव्वा। अदो[2] ज्जे [व] [भणामि अइवल्लहे वि परव्वसे*]

79 [ज*]णे केरिसो वारंवारमणुवं(बं)ध-णिव्वं(ब्वं)धो। वसंतलीला नायिकां सास्रमालिंगति। राजा (।) अपवारितकेन नायिकां चिवु(बु)के स्पृष्ट्वा। प्रिये [।*] अलमन्यथा संभावनया। मुहूर्त्तमास्थानमधिष्ठाय प्रतिनिवृत्त एवास्मि। वसंतलीलां प्रति। आर्ये भवत्या [ऽ*]स्मद्धृदयंगतया लालनीयेयं तावद[स्म][दागमनपर्यन्तं*]...[इति*]

80 विदूषक-कनकलेखाभ्यां सह परिक्रामति। सकरुणं पृष्ठतो[ऽ*]वलोक्य। स्वगतं। आः प्रिये पारिजातमंजरि। उद्भिद्यमान-चंद्रांशु-दंष्ट्रा-कराले निशाचरी-मुखे मुच्यमाना[ऽ*]सि। नायिका। सास्रं। महाभाय [।*] इत्तिगं

---

1. The lacuna here was filled in as above in a copy of the play, belonging to Mr. K. K. Lele, by Mr. P. T. Kapashe and Mr. A. W. Wakankar.

(२) त्वयाऽपि देव्या भयेन मन्दभागिनी पारिजातमञ्जरी परिहर्तव्या। अत एव [भणामि अतिवल्लभेऽपि परवशे] जने कीदृशो वारंवारमनुबन्ध-निर्बन्धः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दिट्ठो सि मए मंदभाइणीए।[१] राजा। सव्यथमात्मगतं। किमपि [मसृ]-[णितायां भ्रूलताविभ्रमाणां मम*]†

81 हृदय-शिलायां विश्वशृंगारशिल्पी। तव ऋजुगुणसूत्रन्यास-रेखांकितायां लिखति विशिखटंकैः पुष्पकेतुः प्रशस्तिं॥ [७५॥*] इति निःक्रांतः (निष्क्रान्तः)। नायिका। सानुतापमुद्भ्रीविकावलोकितकेन। कधं लोयणपहं अदिक्कंतो परव्वसो जणो।[२] स्वगतं। ता दाणि जं देवीए कारिदव्वं तमहं सयं जेव [कर]इ[स्सं] मंदभाइणी॥[३]

82 [इ]ति सोद्वेगमुद्भ्रांत-हृदया परिक्रामति। वसंत। सौत्सुक्यं। नूणमेदाए किंपि अमंगलमज्झवसिदं।[४] ता सव्वधा धारइस्सं॥ इति निःक्रांताः (निष्क्रान्ताः) सर्वे [।*] ताडं(टं)क-दर्पणो नाम द्वितीयोङ्कः॥ श्रीः॥ ०॥ रूपकार-प्रकांडस्य सीहाकस्यांगजन्मना। प्रशस्तिरियमुत्कीर्णा रामदेवेन शिल्पिना॥ ०॥

---

(१) महाभाग। एतावद् दृष्टोऽसि मया मन्दभागिन्या।

(२) कथं लोचनपथमतिक्रान्तः परवशो जनः।

(३) तदिदानीं यद्देव्या कारयितव्यं तदहं स्वयमेव करिष्यामि मन्दभागिनी॥

(४) नूनमेतया किमप्यमङ्गलमध्यवसितम्। तत्सर्वथा धारयिष्यामि।

---

† This is conjecturally filled in by us. Dr. Hultzsch leaves it a blank. Cf. प्रबोधचन्द्रोदयम् iv.12:— 'मसृणितशिलाः' Cf. मालती-माधवम् I. 27:—'स्तिमितविकसितानां etc.'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ श्रीसदानन्दविरचिता परिमलामोदटीका ।

पङ्क्तिः—

(१) अथ तत्रभवान्राजगुरुः श्रीमदनो बालसरस्वत्यपराख्यः कविधाराधीशार्जुनवर्मदेवस्य पारिजातमञ्जरीत्यपराख्यां विजयश्रियं नाम नाटिकां प्रशस्त्यर्थं व्यरचयत् । तत्रादौ तावदाशीर्नमस्क्रियादिमुखेन प्रारभ्य वस्तुनिर्देशरूपेण कथामुपाक्षिपत् । 'आसीत्कश्चिद्दिगन्तकीर्तिर्भोजराजः । स इदानीमर्जुनवर्मदेवस्य रूपेण पुनरेव गामवतीर्णः । तस्येयं श्रवणमधुरा प्रशस्तिरिह धारापुर्यलङ्कारभूतायाः सरस्वतीदेव्याः प्रासादे शिलाफलकयुगलेऽनल्पप्रयासेन लिख्यत' इति । अपि च कविः शार्दूलविक्रीडितच्छन्दोरचितपद्यद्वयेन नान्दीमपठत् । सा चाभिनवगुप्ताचार्याणां मतेन त्र्यस्रतालानुगता त्रिपदा षट्पदा द्वादशपदेति, चतुरस्रतालानुगता चतुष्पदाष्टपदा षोडशपदेति वा पृथक् त्रिविधा भवति । पदान्यत्र श्लोकावयवभूतानि सुप्तिङन्तानि वा श्लोकतुरीयांशरूपाणि वाऽवान्तररूपाणि वेति भवन्ति । एवं स्थिते कीदृशीयं नान्दीति वक्तुं न पारयामः । "श्लोकपादं पदं केचित् सुप्तिङन्तमथापरे । परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे ।" इति च नाट्यप्रदीपेऽभिहितत्वात् । लक्ष्मणसूरिभिस्त्विय द्वादशपदा नान्दीति मन्यते । **तत्तादृगिति** । पुष्पधन्वनः पुष्पमयी चापयष्टिरत्र चन्द्रसुहृदो मदनदेवस्य वामाङ्ग्या रतेरुपमानभूताऽस्ति । चापयष्टिः सुमनोभिर्मनोहरतनुर्मन्मथस्य वामहस्तमलङ्करोति । अपि च सुमनस इव मनोहरा तनुर्यस्याः सा मदनस्य वामाङ्गी तस्य वामपार्श्वमेवालङ्करोति । चापलताया मध्यभागो मुष्ट्या ग्रहणीयो भवति । तथा रतिरपि मुष्टिग्राह्यमध्या भवति । मुष्टिग्रहणेन यच्चापलतायाश्चारुतरमवष्टम्भनं भवति, तेन तस्या आकृतिर्नम्राऽवनता भवति । तथैव मधुरेण मनोहरेणावष्टम्भनेनोपगूहनेन रत्या अप्याकृतिर्नम्रा भवति । कटाक्षवच्छिलीमुखानां व्यापारो गतागतमाकर्णान्तं नटति नृत्यति । तादृशेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यापारेण ननु चापलता धन्या कृतकृत्येव भवति। पक्षे च कटाक्षरूपा बाणा अपि रत्या लोचनानामायतत्वादाकर्णान्तं नटन्ति नटवद् व्यवहरन्ति। तादृशेन व्यापारेण रतिरपि धन्या भवति। अत्र श्रौत्युपमालङ्कारः।

अत्रेदं श्रीहर्षस्य पद्यमपि स्मर्तव्यम्– 'कुसुमसुकुमारमूर्तिर्दधती नियमेन तनुतरं मध्यम्। आभाति मकरकेतोः पार्श्वस्था चापयष्टिरिव॥' इति। अपि च 'काव्यार्थसूचकैर्वर्णैर्नान्दीश्लोकः प्रशस्यते।' इति।

(२) अत्र भगवतः कृष्णस्य बाणासुरविजयसम्बद्धा पौराणिकी कथानुसन्धेया। गोग्रहणार्थमागतेभ्यः कुरुभ्योऽखिलानां गवां रक्षणमर्जुनोऽकरोदिति यैतिहासिकी कथा साप्यत्रानुसन्धेया। पञ्चेषुत्वान्मदनो विषमेषुरिति ख्यातः। कन्दर्पस्य विस्फूर्जद्भिः शरैर्विच्छिन्नभूतामिव राधिकां वासुदेवः करोति। तथा च गीतगोविन्दे–'विरहपाण्डुमुरारिमुखाम्बुजद्युतिरयं तिरयन्नपि वेदनाम्। विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्यथाम्।' इति, तथा 'मनसिजविशिखभयादिव°' 'अविरलनिपतितमदनशरादिव°' 'कुसुमविशिखशरतल्पम्' इत्यादि च वर्णनं राधिकाया विरहविधुरावस्थां संसूचयति। कृष्णो गोपालः गाङ्गेयं स्कन्दमजयत्। अर्जुनोऽपि गाङ्गेयस्य भीष्मस्य नाशे पूर्णमनोरथ आसीत्। अर्जुनपक्षे राधावेधो मत्स्यवेधमधिकृत्य ग्राह्यः। पक्षे भोजदेवस्य बाणवंशीयराज–पराभवः, राढाविजयः, कलचुरिभूप-गाङ्गेयदेवभङ्गश्चानुसन्धेयाः।*

---

* श्रीलक्ष्मणसूरिभिर्विरचितायां पारिजातमञ्जरीव्याख्यायां तु भोजराजपक्षेऽर्जुनवर्मपक्षे कृष्णपक्षेऽर्जुनपक्षे चेदं पद्यं प्रायः विविधार्थकं ग्राह्यमिति निर्दिष्टं भवति। तदस्मभ्योऽपि सम्यग्भाति। कृष्णस्य गोपालनं प्रसिद्धमेव। कृष्णपक्षे गाङ्गेयः स्कन्दः। तथा च 'गाङ्गेयाय नमस्तुभ्यं कार्त्तिकेयाय धीमते।' इति। अथ "तथा राधां कर्णस्य धात्रीं मातरं सूतभार्यां विषमेषु रथस्य भू-ग्रस्तत्वादिसंकटेषु वेधेन कर्णशिरःकर्तनेनेत्यर्थः।" इति श्रीलक्ष्मणसूरयो व्याचख्युः। किन्त्वत्र 'कविराज-राजशेखररचित-बालभारतस्थानि पद्यानि स्मर्तव्यानि–"इह हि सदसि राधां यः शरव्यीकरोति।" इति, "राधावेधकरो हठेन हरते कीर्त्या समं द्रौपदीम्॥" इति, "राधायन्त्रं रचयत पुनर्विद्धमप्यस्त्रविद्धम्" इति च।' इति वयं मन्यामहे। भङ्गः पराजय इति मल्लिनाथो 'भङ्गं जयं चापतुरव्यवस्थम्' इत्यस्य (रघु. VII. 54) व्याख्याने।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रबन्ध-चिन्तामणौ 'भोजराज मया ज्ञातं राधावेधस्य कारणम्। धाराया विपरीतं हि सहते न भवानिति।' इति दृश्यते। अत्र राधा-देशमधिकृतं लिखितं न वेति न शक्यं निश्चेतुम्।

(३) 'शृङ्गाटकचतुष्पथे' इत्यमरः। अनेन बाणभट्टकृत-मुज्जयिनीवर्णनं 'अमरमन्दिरैर्विराजित-शृङ्गाटका' इति स्मारिता वयम्। अत्र चैत्र-पर्वणा वसन्तोत्सवो निर्दिष्टः। तथा च वात्स्यायनीये कामसूत्रे 'पक्षस्य मासस्य वा प्रज्ञातेऽहनि सरस्वत्या भवने नियुक्तानां नित्यं **समाजः**।' इति यन्निबद्धं तदत्रावधारणीयम्। यशोधरविरचितायां जयमङ्गलायामस्य यत् स्पष्टीकरणं कृतं तदप्यत्रोपयोजनीयम्—"यद्दिनं यस्या देवताया लोकप्रसिद्धं तत् प्रज्ञातम्। यथा····सरस्वत्याः पञ्चमी····। सरस्वती च नागरकाणां विद्याकलास्वधिदेवता, तस्या आयतने पञ्चम्याम्।.... पूजोपचारकत्वेन प्रतिपक्षं प्रतिमासं च ये नियुक्ता नागरकनटादयो नर्त्तितुं तेषां **समाजः**, स्वव्यापारानुष्ठानेन मिलनम्, यस्मिन्प्रवृत्ते नागरकाः **सामाजिका** भवन्ति।" इति। अपि च कौटिलीयार्थशास्त्रे 'पर्वसु वितर्दिच्छत्रोल्लोपिकाहस्तपताकाछागोपहारैःश्चैत्रपूजाः कारयेद्' इति स्पष्टीकृतं (IV 3) तदप्यत्रावधार्यम्। अथ च "°वैश्रवण-श्री-मदिरा-गृहं च पुरमध्ये कारयेद्" इति यदन्यत्र तस्मिन्नेव ग्रन्थोत्तमे (II. 4) संसूचितं तदपि विमर्शनीयमत्र ॥ ऋचो यजूंषि सामानीति तिस्रो विद्याः त्रिविद्याः। ता अधीते **त्रैविद्यः**। 'तदधीते तद्वेद' इत्यण् (पा. ४.२.५९)। **गौडान्वयेति**। अत्र भेदभावपरम्परितरूपकमुपलभ्यते।

(४) अस्यां नाटिकायां शृङ्गारः प्रधानो रस इति प्रतीयते। अथ च भरतमुनिप्रणीत—नाट्यशास्त्रात् 'शृङ्गारो विष्णुदैवत्य' इत्येतत्सम्यगाकलय्य कविरेष कृतवान् विष्णोर्नुतिं प्रारम्भे। गङ्गाधरायणेरिति। गङ्गाधरस्यापत्यं पुमान् गङ्गाधरायणिः। 'प्राचामवृद्धात्फिन्बहुलम्' इत्यपत्ये फिन्प्रत्ययो भवति बहुलं प्राचां मतेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वस्तुतस्तु नाटक-नाटिकयोरस्ति भेदः। तथा च "सूत्वा नाटक-नाटिका–प्रकरण–प्रायान्प्रबन्धान्बहून् विश्राम्यत्यधुनाऽपि नातिशयिता वाणी शिवस्वामिनः।" इति भवति सुभाषितम्। अतः श्रीकृष्णकविरचितायां मन्दारमरन्दचम्प्वां यल्लिखितं तदेव सम्यक्प्रतिभात्यस्मभ्यम्।

"नाटिकां च प्रकरणीं रूपकं केचिदूचिरे।
नाटिकायां ख्यातवृत्तं भारती वृत्तिरिष्यते॥
स्त्रीबाहुल्यं, तथाङ्कास्तु चत्वारो, नायिका पुनः।
सा दिव्यमर्त्यान्यतरा सदान्तःपुरवासिनी॥
मुग्धा देवीवशंगता तादृक्सुन्दररूपिणी।
नायकस्तु प्रवर्तेत तद्देवीत्रासशङ्कितः॥
सा तु देवी प्रगल्भा च गम्भीरा मानिनी तथा।
तदानुकूल्यादन्ते च तयोरेकत्र सङ्गमः॥
सा नायिका तु वचसा नानुरागं प्रकाशयेत्।
कैशिक्यङ्गानि चत्वारि शेषं नाटकवन्मतम्॥'

इति नाटिका।" इति। एतादृगेव दशरूपके (III 43-48) साहित्य-पदर्पणे च नाटिकाया वर्णनमुपलभ्यते।

निखिलमिदं वर्णनमत्र युक्तरूपमेव भासते। यतः प्रथमशिलापट्टि-कायामङ्कद्वयं वर्तते, यतश्चेयं नाटिका शिलायुगल आसील्लिखिताऽतः सम्भाव्यत एवास्या नाटिकाया अङ्कचतुष्टयवत्त्वम्। तथा चानुमेयमिदं यन्ना-यिकानायकयोरङ्कचतुष्टयस्यान्ते मिलनमासीदिति। अपरं च प्रथमाङ्के नायिकाया अपि दिव्यमानुषीत्वं मुग्धत्वं देवीवशगत्वं च स्पष्टीकृतान्येव। नायकोऽपि द्वितीयेऽङ्के देवीकोपशङ्कित इव प्रवर्तते। अङ्कद्वयेऽस्मिन् स्त्रीबाहुल्यमपि सर्वथा दृश्यते।

अपि चेयं नाटिका कर्पूरमञ्जर्याख्य-सट्टकमनुगतेति विशदीकृतमेवा-स्माभिरधःस्तात्। अत्र कर्पूरमञ्जर्यामेव यल्लिखितमनयोर्नाटिका-सट्टक-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

योरन्तरं तदवधार्यम्—" सो सट्टको ति भणई दूरं जो णाडिआइं अणुहरइ । किं उण एत्थ पवेअस-विक्कम्भाईं ण केवलं होन्ति ॥ " (तत्सट्टकमिति भण्यते दूरं यन्नाटिका अनुहरति । किं पुनरत्र प्रवेशक—विष्कम्भकौ न केवलं भवतः ॥) इति । कर्पूरमञ्जर्यामपि दृश्यतेऽङ्कचतुष्टयम् ।

(५) अपहस्तितः दूरीकृतः कदर्थितो वा । अथवा विद्रावित इति । विहस्तो व्याकुलइत्यर्थः । ' विहस्त-व्याकुलौ समौ ' इत्यमरः । व्याकुलानां मनस्विनीनां मानः कलकण्ठ-मिथुनमधुरकलकलेन हेलया दूरीक्रियत इत्यर्थः। चंगेति। देशभाषायां सुन्दरेत्यर्थे । साधुरिति यावत् । ' चषकोऽस्त्री पानपात्रम् ' इत्यमरः । षट्चरणाः षट्पदा इत्यर्थः । त एव चारणाः । ' षट्पदभ्रमरालय ' इत्यमरः ।

(६) विडव-कुडङ्गेति । हालविरचितगाथा-सप्तशत्यां " गोलातड-विअडकुडङ्गमहुअ " इति लभ्यते । अस्यार्थः ' गोदातटविकटकुञ्ज-मधूक ' इति विदुषां संमत एव। भारतीभवनं सरस्वतीमन्दिरमित्यर्थः। 'प्रबन्धकल्पना कथा' इति 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ' इति चामरः । 'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ' इत्यप्यमरः । 'आपः सुमनसो वर्षा अप्सराः सिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम् ॥' इति ।

(७) चैत्रमासे सुमनसः स्मितमिव मधुरतां मनोहरतां बिभ्रति । कुतः । ताश्चैत्रमासं कान्तं प्रियकरमिव लभन्ते । अतस्तासां स्त्रीत्वमतिसुन्दरं भवति । अपि च पारिजातमञ्जरी यत्स्त्रीत्वं बिभर्ति, तदधिकृत्यान्योऽ-र्थोऽवधारणीयः । सुमनसां मृद्वीनां (स्त्रीणां) स्त्रीत्वमतिसुन्दरं भवति रमणीयं मधुमासमासाद्येति । यतस्ताः स्मितमाधुरीं बिभ्रति । अपि च यथा श्रीलक्ष्मणसूरिभिर्निर्दिष्टं—' अत्र सुमनसां पारिजातकुसुमानां स्त्रीत्वं विजय-श्रीरूपेण परिणमनं स्थाने ', यद्वा युक्तरूपमेवेति तत्समीचीनम् । श्रीलक्ष्मण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूरयोऽत्र काव्यलिङ्गोदाहरणमाचक्षते । तस्य लक्षणं—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति । श्रीलक्ष्मणसूरिभिः 'दयावीरो दानवीरो युद्धवीरश्चेति वीराणां त्रैविध्यम्' इति व्याख्यातम् । अन्यच्चात्र वैकुण्ठ-रूपस्य नरहरित्वमवधारणीयम् । तथा च खर्जूरवाहकस्थ-वैकुण्ठवेश्मनि स्थितायां शिलापट्टिकायां—'दधानामेकां यः किरि—पुरुष—सिंहाननजुषं ....स वैकुण्ठः कण्ठध्वनिचकितनिःशेषभुवनः ॥' इति वैकुण्ठरूपस्य वर्णनमुपलभ्यते । अपि च तस्मिन्मन्दिरे तद्रूपं गर्भगृहस्थमूर्त्यां संदृश्यते ।

(८) मार्तण्डमण्डले धूलिकदम्बसैंहिकेयकवलिते सुरसुन्दरीणां मुखचन्द्रा आविर्भवन्तीति सूचितम् । एवमनुमानालङ्कारोपजीविन्युत्प्रेक्षेति सङ्करः । अत्राग्निपुराणस्थः—'वराप्सरःसहस्राणि भूपमायोधनं हतम् । त्वरिता-न्युपधावन्ति मम भर्ताऽयमेति च ॥' इति श्लोकोऽवधारणीयः । "पृथ्वि स्थिरा भव....। दिक्कुञ्जराः कुरुत....॥" इत्यत्रापि दिक्करिभिः पृथ्व्या धारणं सूचितम् ।

(९) आर्य इति । 'पत्नी चार्येति संभाष्या' इति भरत-वचनात् । सूत्रधारो नटानां प्रमुखः । ते च जायाजीवाः । नटय एव तेषां जायाः । 'नटी रङ्गयोषित्' इति यशोधरः । अतो नटीप्रमुखा सूत्रधारस्य पत्नी भवितुमर्हति । पुरन्दरपुरममरावती । 'कपाटमररं तुल्यं' इत्यमरः । 'वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ।' इत्यमरः ।

(१०) गलहस्तनं गलागलि । 'कण्ठो गल' इत्यमरः । कण्ठा-कण्ठीत्यर्थः । गाथासप्तशत्यां "खरपवणरअ-गलत्थिअ" इत्यादिश्लोकोऽत्र द्रष्टव्यः । 'जङ्घालोऽतिजवस्तुल्यौ जङ्घाकरिकजाङ्घिकौ ।' इत्यमरः । हेवाकिनी ललितविभ्रमवतीत्यर्थः ।

CC-0. Agamnigam Foundation, Chandigarh

(११) द्रष्टव्यमत्र भरतमुनेर्नाट्यशास्त्रम्–'इह प्रकृतयो दिव्या तथा च दिव्यमानुषी । मानुषी चेति विज्ञेया नाट्यनृत्तक्रियां प्रति ॥ देवा हि प्रकृतिर्दिव्या राजानो दिव्यमानुषी । या त्वन्या लोकविदिता मानुषी सा प्रकीर्तिता ॥' इति। नद्यम्बुजीवी देशो नदीमातृक इति ख्यातः। तथा ह्यमरः– 'देशो नद्यम्बु-वृष्ट्यम्बु-संपन्नव्रीहिपालितः । स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्' इति । 'समरविजय-लक्ष्मीः सैव मूर्त्ता बभूव' इति भावः ।

(१२) स्वर्द्रुममञ्जरी पारिजातमञ्जरीत्यर्थः । 'पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥' इत्यमरः । कवीश्वरबाणभट्टविरचितायां च कादम्बर्यां दृश्यते 'इयं चासुरासुरैर्मथ्यमानात्क्षीरसागरादुद्गतः पारिजातनामा पादपस्तस्य मञ्जरी' इति । कविबाणभट्टस्य कादम्बर्यां जयकुञ्जरकुम्भस्थलाल्लक्ष्म्या आकृष्यमाणत्वं पुनः पुनर्वर्ण्यते । अनेनापरैश्चोल्लेखैर्बाणभट्टस्य प्रभावो मानसेऽस्य कवेः कीदृगिति सम्यक्प्रतीयते । अपरं च यदत्र कथितं, तेन प्रमदवनोद्याना-धिकृताः कञ्चुकिन एवासन्नित्यपि प्रकटीकृतम् ।

(१३) अत्र यशोधरकृतजयमङ्गलाख्या टीका द्रष्टव्या । "सुवसन्तो मदनोत्सवः । तत्र नृत्यगीतवादित्रप्रायाः क्रीडाः । एता माहिमान्यः क्रीडाः ।" इति, "मदनोत्सवो मदनप्रतिकृतिपूजनम्" इति च । हयाननाः किन्नरा इति । ते च देवगायनाः । विष्णुधर्मोत्तरे "किन्नराः द्विविधाः प्रोक्ता नृवक्त्रा हयविग्रहाः । नृदेहाश्चाश्ववक्त्राश्च तथाऽन्ये परिकीर्तिताः ॥" इति (III. 42.13-14) स्पष्टीकृतम् ।

(१४) चैत्रोत्सवे मन्मथस्य प्रादुर्भावः कर्पूरमञ्जर्यामपि सूच्यते 'देअस्स पञ्चेसुणो दिण्णा चित्तमहूसवेण भुअणे आणेव सव्वंकसा ॥' इति । मन्दारमरन्दचम्पूरत्र 'मोहायितं मिषादिष्टकथादौ भावसूचनम्' इति स्पष्टी-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करोति । 'मोट्टायितं प्रियं स्मृत्वा स्वाङ्गभङ्गादि वा यथा ।' इति लक्षण-मलंकारसंग्रहे । 'मोट्टायितं स्यात्तद्भावभावनेष्टकथादिषु ।' इति च दशरूपके ।

महाराजश्रीमदर्जुनवर्मदेवप्रणीतायां रसिक-संजीवनी-समाख्यायां व्याख्यायामिदमुपलभ्यते—"क्षिप्ताशुभः सुभटवर्मनरेन्द्रसूनुर्वीरव्रती जगति भोजकुलप्रदीपः। प्रज्ञानवानमरुकस्य कवेः प्रसार(?द)श्लोकाञ्छतं विवृणुतेऽ-र्जुनवर्मदेवः ॥" इति । अतः स्पष्टमेव यत्सुभटक्षितीन्द्रसुतो न कोऽप्यन्यः, किंतु श्रीमदर्जुनवर्मदेव एवेति । 'करीणां घटना घटा' इत्यमरः ।

(१५) 'कण्णाडीणं कुणन्ता चिउरतरलणं, कुन्तलीणं पिएसुं°' ('कर्णाटीनां कुर्वन्तश्चिकुरतरलनं, कुन्तलीनां प्रियेषु°') इत्यादौ कर्णाट-कुन्तल-देशयोर्भिन्नत्वं व्यज्यते श्रीराजशेखरविरचितायां कर्पूरमञ्जर्याम् (I. 15) ।

ततः प्रविशतीति । 'एषामन्यतमेनार्थं पात्रं चाक्षिप्य सूत्रधृक् । प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत ॥' इति दशरूपके उक्तत्वात् । अत्र विदूषकस्य लक्षणं—

"गूढमन्त्रः शुचिर्वाग्मी भक्तो नर्मविचक्षणः ।
स्यान्नर्मसचिवस्तस्य कुपितस्त्रीप्रसादकः ॥
.....क्रीडाप्रायो विदूषकः ।
स्ववपुर्वेषभाषाभिर्हास्यकारी स्वकर्मकृत् ॥"

इति शृङ्गारलक्षणेऽभिहितम् ।

(१६) श्रीराजशेखरस्तु कर्पूरमञ्जर्यां प्राह—

"इत्थं कोइल-मञ्जु-सिञ्जन-मिसा देअस्स पञ्चेसुणो
दिण्णा चित्तमहूसवेण भुअणे आणेव सव्वंकसा ॥"

(इत्थं कोकिल-मञ्जु-शिञ्जन-मिषाद्देवस्य पञ्चेषोर्दत्ता चैत्रमहोत्सवेन भुवने आज्ञेव सर्वंकषा ॥) इति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(१८) ' डिम्बे डमर–विप्लवौ ' इत्यमरः । **सुपहायेति** । अत्र सूरो सूर्यः शूर इति वा । अतः श्लिष्टं समस्तवस्तुविषयं रूपकम् ।

(१९) अत्रेदमनुसन्धेयम् । वसन्तोत्सवः सुवसन्तको मदनोत्सव इति वाऽभिधीयते। वात्स्यायनीये चाष्टमीचन्द्रकौमुदीसुवसन्तकादिषु पत्तन–नगर–खर्वट–योषितामीश्वरभवने सहान्तःपुरिकाभिः प्रायेण क्रीडेति कामित्वविधिविशेषो विहितः । **वाणेहिं** इति । व्यतिरेकालङ्कारः ' उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ' इति तल्लक्षणात् ।

(२०) अत्र चैत्रोत्सवस्यातिमनोहरं वर्णनमुपलभ्यते । पौराणामट्टहासैः सिन्दूरं मृगनाभिक्षोदश्चन्दनं केशरश्चोच्चैरुड्डीयन्ते । पौराङ्गना अपि चासन्तिककुसुमविरचितमण्डना मनोहरशरीराः स्वैरं सिन्दूरलेखा ललाटफलके धारयन्ति । अस्मिन्कर्मणि तासां चिकुरनिकरोऽप्यरुणायते । अपि च ता नृत्यन्त्यो मदविह्वलं स्खलन्ति । मृदङ्गं वादयतश्च प्रियकरानालोकयन्ति सस्मितमित्यर्थः ।

(२१) अत्रायं ध्वनिः–' पदविह्वलता क्वापि भवति रमणीया । ' इति । मदविह्वलं नृत्यन्त्यो नागररमण्यो लयविसंवादं कुर्वन्ति । अत्र ' लयः साम्यमथाल्लियाम् । ' इत्यमरः । ' विप्रलम्भो विसंवादः ' इत्यमरः । ' शिल्पम् ' (पा. ४.४.५५) इति ठक् प्रत्ययो भवति । मुरजवादनं शिल्पमस्येति मौरजिकः । मुरज इत्यानद्ध–वाद्यविशेषः ' आनद्धं मुरजादिकमि'त्युक्तत्वात् । मुरजो मृदङ्ग इति केचित् । ' मार्दङ्गिका मौरजिका ' इत्यमरः ।

(२२) संगीतशास्त्रे ' निषादर्षभगान्धारषड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः॥ ' प्रसिद्धाः । तथा च ' नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः । स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते ॥ ' इत्यपि सुविदितमेव । अपि चोक्तम् " चतुश्चतुश्चैव षड्ज–

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मध्यमपञ्चमाः । द्वे द्वे निषाद-गान्धारौ त्रींस्त्रीनृषभधैवतौ " इति । तत्र च 'पिकः कूजति पञ्चमम् ।' इति, 'षड्जं मयूरो वदति ।' इति च लक्षणाभ्यामेतयोः स्वरयोर्महत्त्वमाकलयेत् । श्रीलक्ष्मणसूरिभिरत्र संगीतरत्नाकरस्थानि पद्यान्युद्धृतानि । " धैवत्यार्षभिका-वर्ज्य-स्वर-नामक-जातिजः । हिन्दोलको रिधत्यक्तः षड्जन्यासग्रहांशकः ॥ आरोहिणी प्रसन्नाख्ये शुद्ध-मध्याख्यमूर्च्छनः । काकलीकलितो गेयो वीरे रौद्रेऽद्भुते रसे ॥ वसन्ते प्रहरे तुर्ये मकरध्वजवल्लभः । सम्भोगे विनियोक्तव्यः···॥ ' इति संगीतरत्नाकरे । हिन्दोलक—चतुर्थी वात्स्यायनीये कामसूत्र आलोलचतुर्थीति ख्यायते । कामसूत्र-टीकाकारो यशोधरः " आलोलचतुर्थी श्रावणशुक्लतृतीयायां हिन्दोलक्रीडा " इत्याह । (दृश्यतामत्र परिशिष्टं 'क')

कविराजराजशेखरविरचितायां कर्पूरमञ्जर्यामपि हिन्दोलक-चतुर्थ्या वर्णनं पल्लवितं दृश्यते—" अज्ज हिन्दोलणचउत्थी । तहिं देवीए गौरी कदुअ कप्पूरमञ्जरीं हिन्दोलए आरोहइदव्वा । " इति, 'हिन्दोलण-लीलाललणलम्पडं चक्कवक्कलं रमणम् । किलकिलइ व्व सहरिसं कञ्चीमणि-किङ्किणिरवेण ॥ ' इत्यादिभिश्च पद्यैः । तस्मिन्नेव सट्टकेऽन्यत्रापि दृश्यते—'तस्स ताए देवीए दलसंपुडेहिं अज्ज हिन्दोलअप्पभञ्जीए चउत्थीए हर-वल्लहा देवी अच्चिदा ।····तीए वि एक्केण दलसंपुडेण भअवदी गोरी ज्जेव अच्चिदा ।' इति । स्पष्टमेवेदं भाति यद्राजशेखरकविशेखररचित-कर्पूरमञ्जर्या बालसरस्वत्यपराख्येन मदनेन विरचितेयं पारिजातमञ्जरी नूनमतीवोद्भासिता प्रभाविता च । अस्मिन्प्रबन्धद्वये समीरवर्णनपरा । कतिचन श्लोका दृश्यन्ते, नातिनिपुणविदूषक—विचक्षणचेटी—संवादादिसाधर्म्यमपि दृग्गोचरं भवति । मन्दार—मरन्दचम्पूस्थमत्रेदं पद्यमपि स्मरणीयम्—" लिलेख मकरीं कान्ता घुसृणेन कपोलयोः । तावलंचक्रतुस्तस्या मकरीं मकरोन्नतौ (?) ॥" इति ।

(२३) 'कल्याणं मङ्गलं शुभम्' इत्यमरः । 'महिडायो····

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

निरर्थं च छुदं च मंगलं करोते। ' इत्यशोकः सम्राट्। मङ्गलानि नाम मङ्गलमयानि कल्याणकराणि वा गीतानि विवक्षितान्यत्र। प्राकृतभाषाया गोरिगेयो गौधेरः स्यात्। गौधेरो गोधापुत्रो भवति। गोधा गौर्या वाहनम्। तथा चोक्तम्। 'गोधासना भवेद्गौरी' इति। अथ गौधेरोऽन्त्यन्त-विषयुक्तोऽस्तीति जना मन्यन्ते। गहिल्लो गृहीत इति। 'मत्वर्थे आल-इल्लौ' इति प्राकृतलक्षणे निर्दिष्टम्।

(२४) "ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवोचितैः। अलक्षितं द्विजद्वारे सूत्तमानां स्मितं भवेत्।" इति नाट्यलोचने। अपि च 'स्यादा-च्छुरितकं हासः, सोत्प्रासः स मनाक् स्मितम्।' इत्यमरः। सिन्दूरो रक्त-चूर्णम्। मूर्ध्नो नम्रीकृतत्वेन दाक्षिण्यं प्रदर्शितम। अपि च सप्रणाम-निषेधेन देव्या मानभङ्गो राज्ञश्चान्यसङ्क्रान्तहृदयत्वं व्यज्येते। अत्र नाट्य-वस्तुनो बीजप्रकाशनं कृतमिति प्रतिमुखसन्धिः। तथा च सुधाकरे—'बीज-प्रकाशनं यत्र दृश्यादृश्यतया भवेत्। तत् स्यात्प्रतिमुखम्' इति।

(२५) 'मृगनाभिर्मृगमदः कस्तूरी च' इत्यमरः। 'देवि, तव स्मेरानने भ्रमराणां भ्रमो भवति यन्नेदमाननं, किन्तु कमलमिदमिति। अतस्तस्मिंस्ते सौरभाकृष्टा निषीदन्ति। तेषां स्निग्धत्वान्नीलत्वाच्च तव मुखे मकरकेतनस्य शृङ्गारलीलेवोत्पन्ना भवति। कीदृशी। मृगनाभिविर-चितपत्रावलीरूपेण। अथेदृशं ते मकरकेतनलीलास्थानं वदनं को नु खलु पुनः कस्तूरिकया पङ्किलं कर्तुमिच्छति।' इति भावार्थः। अनेन देव्या निराकृतिरेव ध्वन्यते।

(२६) 'उत्कण्ठोत्कलिके समे' इत्यमरः। अत्र यो भावो मृगद्वन्द्वेन प्रकटीकृतः स कालिदासेन प्रागेव वर्णितः कुमारसम्भवे—'शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः।' इति। श्रीखण्डशैलो मलयपर्वतः। श्रीखण्डशैलानिलो मलयमारुतो दक्षिणानिल इत्यर्थः। तस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
सुरतग्लानिहरणं कालिदासीयकाव्येषु वर्णितमेव । अपि च गीतश्रमवारिलेशान् वायुर्दूरीकरोतीत्यपि तेषु प्रसिद्धम् ।

(२७) 'विचिकित्सा तु संशयः । संदेह–द्वापरौ च···।' इत्यमरः । शाकुन्तले प्रथमेऽङ्केऽप्येतादृश्येव कल्पना दृश्यते । तथा ह्यनुसूया वदति–'इयं सअंवरवहू सहआरस्स तुए किदणामहेआ वणजोसिणित्ति णोमालिआ ।' इति ।

(२८) नवफलिका पारिजात-मञ्जरीति । अनेन विजयश्रियो मुग्धत्वं नववधूत्वं च ध्वन्येते ।

(२९) पारिजातमञ्जरीसनाथमपि शून्यमिति विरोधस्याभासत्वे विरोधाभासालङ्कारः । सान्ध्यं रागमिति । विप्रयोग–शृङ्गारः । यथा तमःप्राये व्योम्नि प्रतिपच्चन्द्रलेखा मदनकृतेऽपमं प्रतापं विधत्ते, तथेयं पारिजातमञ्जर्यपि ममान्धकारमये हृदये नवोदिताऽपि सती विषमेषुविषमप्रतपनं विधत्त इति भावः ।

(३०) तिसियाण इति । इदानीं मध्याह्नसन्ध्या जातेति व्यज्यते। "तव रिपूणां योषितः कानन एव वसन्ति । अपि चेदानीं मध्याह्नसन्ध्यायां तासां वदनानि स्वीयहारमुक्तासु बिम्बितानि भवन्ति । ननु तान्यत्यन्ततृषितानि सन्ति । अथ तृष्णापनयनार्थं तासु हारलतासु सलिलभावेन विशन्ति ।" इति भावः । भ्रान्तिमदलङ्कारः । स चोत्प्रेक्षया निबद्धः । भ्रान्तिमदुत्प्रेक्षयोरङ्गाङ्गिभावेन सङ्करः ।

(३१) 'भवता बन्दीकृतानां रिपुयोषितां विरहेण, भवतः पराभूता रिपवो मधुमासागमेऽतीव तीव्रां वेदनामनुभवन्ति । अपि च मध्याह्नसन्ध्यायां बहिस्तापमनुभवन्ति ।' इति भावः । इति **प्रथमोऽङ्कः** ।

(३२) अथ **द्वितीयोऽङ्कः**। अत्र प्रथमं तावत् सर्वकलायाः समस्तकलेति समानार्थमभिधानमुपयुनक्ति कविर्वैचित्र्यपरिपोषार्थम् । 'समस्त-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कलयामलयानिलेन ' इत्यत्र लाटानुप्रासमन्यत्र च च्छेकानुप्रासमपि प्रयुनक्ति सः। अथ सहकार–माधवी–समागममभिनन्दितुमिव देव्या सर्वकलया य उत्सव आरब्धस्तस्य कलकलेन, वारयोषितां च कोमलमङ्गलगाननिनादैर्मुखरितदिङ्मुखो धारागिरिरानन्दमय इवासीदिति भावः॥ अपि च निखिलं जगन्नर्तकीभिः सार्धं नर्त्तितुमिवारभतेति पल्लवयति कविः। तथा च दक्षिणप्रञ्जनेन पादपा युवानश्चोन्मत्ता इवानृत्यन्तेति भावः। हठादाकृष्टान्पादपान् नर्त्तित–किसलया उद्भिन्न–कोरका लताः कुसुमितस्मितविलासवतः कुर्वन्ति। तथैव स्मित–विकसितकान्तीनामौचित्यपूर्वनर्मपरिहासादिकुशलानां तरुणानां केशानंशुकांश्च हठादाकर्षन्त्यो वारयोषितस्तान्पुलकयन्ति। अपि चानर्त्तितभ्रूलतास्तास्तानङ्गुलीभिस्तर्जयन्ति। अत्र परस्परसमागमनेन सर्वेऽपि सुखमाप्नुवन्तीति भावः। वैदर्भी चात्र रीतिरोजः-प्रसाद–श्लेष–माधुर्यादि–गुणोपेता दृश्यते।

(३३) अत्र कुसुमाकरोऽङ्कवस्तूपन्यासं पारिजातमञ्जर्यवस्थावर्णनेन सूचयति। केवलमेकाकिनी बाला पारिजातमञ्जरी मुग्धा मुहुस्ताम्यति। किमर्थम्। राज्ञोऽर्जुनवर्मदेवस्यैकान्ते दर्शनमलभमानाऽथवा तद्दर्शनव्यथितचित्ता सोत्कण्ठनिःश्वासपरम्पराभिरन्तरेव तप्यते। "उत्कण्ठोत्कलिके समे" इत्यमरः। तस्या उन्मत्तप्रलपितमुदाहरति। सन्ध्यासमये रथाङ्गनाम्नोर्विरहार्तामवस्थां दृष्ट्वाऽन्ये पक्षिणः किं न संमील्य तौ सान्त्वयन्ति, किं वा न ते तयोर्मिलनेन हृदयव्यथां दूरीकुर्वन्तीति परिम्लाना पुनः पुनः पृच्छति॥ अप्येते सर्वे वसन्तोत्सवामोदपरिहृतचिता जना विरहव्यथितां मां सान्त्वयेयुर्न वेति भावः। "अत्र विटपि–पल्लव–कोरक–पदैर्वाराङ्गना–विट–संबन्धस्येव लताशाखि–संबन्धरूप–प्रकृतान्तरस्य द्योतनात्प्रस्तुतालङ्कारः।" इति लक्ष्मण–शास्त्रिणः। रामायण–कथाश्च शृण्वाना श्रीरामचन्द्र–जानकी–विरह–वर्णन–

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
श्रवणेन स्मारितात्मावस्थोत्तराधरीकृतस्तनतटी स्वविरहाक्षिप्तचित्ता शून्यमानसेन हुंकारं ददत्यात्मनः सखीमपि करुणकरुणैरात्मचरित्रैर्विस्मारितार्थां करोतीति भावः। इयं च विरहोत्कण्ठिता नायिका—' चिरं पत्युरनालोके विरहोत्कण्ठितोन्मनाः । ' इत्युक्तेः ।

(३४) **तन्वीति** । हिमांशोरातपेनापि तन्वीयं तापातिरेकमनुभवति व्याकुलतां च धत्ते । अत्र कारणविरुद्धकार्योत्पत्तिरूपो विषमालङ्कारः। ' विहस्तव्याकुलौ समौ ' इत्यमरः । लता अपि विद्रुमकैरातपतापं निवारयन्ति । अत्रैकदेशविवर्तिरूपकम् । अथात्र भरतमुनिमतानुसारेण विप्रलम्भ—शृङ्गारो, यो निर्वेद-ग्लानि—शङ्कासूया—श्रम—चिन्तोन्माद—जाड्य—मरणादिभिरनुभावैरभिनेतव्यः ॥ लक्ष्मणशास्त्रिणस्त्वत्र शृङ्गारं त्रिविधमाहुः । इमं चायोगशृङ्गारं ब्रूयुः । 'तत्रायोगोऽनुरागेऽपि नवयोरेकचित्तयोः । पारतन्त्र्येण दैवाद्वा विप्रकर्षादसङ्गमः । ' इति वचनात् । **नेपथ्येति** । ' नेपथ्यं स्याज्जवनिका रङ्गभूमिः प्रसाधनम् ' इत्यजयः । जवनिकाभिमुखमवलोक्येत्यर्थः । वसन्तलीलागमनसूचनार्थं जवनिकाभिमुखं नाटयेनावलोकयतीति भावः । **ऋज्विति** । सरलावलम्बिभुजद्वयमुद्वहन्ती मन्थरगतिरधोमुखी वसन्तलेखा निम्नहस्तेन शून्यमनसाऽकाशविलेखनं कुर्वती पारिजातमञ्जरीदुःखदुःखिता चिन्तातुरा दृश्यत इति भावः । तथा च मालतीमाधवे—' मनो निष्ठाशून्यं भ्रमति च किमप्यालिखति च । ' इति ।

(३५) **उत्तुङ्गेति** । ' अथ विद्रुमः पुंसि प्रवालं पुंनपुंसकम् ' इत्यमरः । ' सार्थो वणिक्समूहे स्यादपि सङ्घातमात्रके ' इति विश्वः । पर्युत्सुकत्वमत्यन्तौत्सुक्ययुक्तत्वं व्यञ्जयति । तथा हि—' कालाक्षमत्वमौत्सुक्यं मनस्तापज्वरादिकृत् । ' इत्यलङ्कारः । पारिजातमञ्जरी तथा चिन्तयाऽवनतमुखी भवति यथाऽस्या ओष्ठपुटविद्रुमत्विषां निकरेण तत्समीपस्थं तस्याः प्रोन्नत—स्तन—शिखर—द्वयमुद्भासितमिव भासते । स्तनमण्डलस्यौष्ठविद्रुमप्रभासङ्क्रामितत्वात्स्वगुणत्यागलक्षणस्तद्गुणालङ्कारः । ' तद्गुणः स्वगुण-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

त्यागादन्योत्कृष्टगुणाहृतिः।' इति तल्लक्षणात्। अन्यथा दूरारोह–निरीक्षणं प्रियतमं पर्युत्सुकं तन्मनः श्वासोच्छ्वास–गतागतेन नितरामन्तः प्रविश्य पश्यति रक्तं च भवतीत्यर्थः। अत्रापि तद्गुणालङ्कारः। लक्ष्मणशास्त्रिणस्त्वत्र हेतूत्प्रेक्षालङ्कारोदाहरणं मेनिरे।

(३६) 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्याद्' इत्यमरः। वैदग्ध्यं प्रयोग–कुशलता। विदग्धो विदूषक इति यावत्। नर्मेति। 'परिहास-प्रधानं यद्वचनं नर्म तद्विदुः।' इति मन्दारमरन्दचम्पूः। 'द्रव–केलि–परीहासाः क्रीडा लीला च नर्म च' इत्यमरः। नर्मसुहृन्नर्मसचिव इति यावत्। तल्लक्षणम्–'नर्मभेद–प्रयोगज्ञो हास्यकृन्नायकस्य च। नर्मवादी स वै नर्मसचिवश्च विदूषकः॥' इति। अपदेशेन व्याजेन निमित्तेन वा। तथा हि 'व्याजोऽपदेशः' इति, 'पदे लक्ष्ये निमित्तेऽपदेशः स्यात्' इति चामरः। समरस्य चरमक्षणः शुद्धान्तक्षण इवाभवदित्यर्थः। विजयश्रीलाभेन शुद्धान्तो नृपस्य स्वीयं कक्षान्तरं स्त्र्यगारं वा संजातम्। 'कक्षान्तरेऽपि शुद्धान्तो नृपस्यासर्वगोचरे' इति, 'स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम्। शुद्धान्तश्चावरोधश्च' इति चामरः। 'निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः।' इत्यप्यमरः।

(३७) 'सम्भावना वासनायां गौरवे ध्यानकर्मणि' इत्यजयः। नो सम्भावयतीति। इयं षष्ठी कामावस्थाऽरत्याख्या। तथा च–'दृङ्मनः सङ्गसङ्कल्पो जागरः कृशताऽरतिः। ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश॥' इति। कथान्ताय कथान्तं कर्तुम्। तुमर्थे चतुर्थी। उल्लासेति। अनेन राजगतं दैन्यं दर्शितम्। 'हृत्ताप–दुर्गतत्वादेरनौचित्यं हि दुर्गता' इति तल्लक्षणात्। छेक–वृत्त्यनुप्रासौ स्पष्टावेव। सर्वकलाश्रितस्य वियोग-वत्त्वं विरोधाभासालङ्कारः। 'आभासत्वे विरोधस्य विरोधाभास उच्यते' इति लक्षणात्।

नो संभावतीति। व्यर्थकमिदं पद्यम्। पक्षे राजानं चन्द्रमधिकृत्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
चकोरसम्भावना—कुमुदोल्लासन — सरित्पत्युदञ्चन — सकलषोडशकलाश्रितत्व — दिवसोद्भूतपाण्डुत्वापादनादि—विशेषणान्यवधारणीयानि । अर्जुनवर्मपक्षे निजभृत्यसम्भावना—पृथ्वीवलयप्रीति— सेनापतिप्रोत्साहन— सर्वकलादेव्याश्रित-त्व-पाण्डुताधानादि—विशेषणान्युपलक्षयितव्यानि ।

(३८) ' निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ' इत्य-मरः । विरहे पाण्डुतामाननश्रीर्भजत इति सुप्रसिद्धमेव । अत्र स्वभावो-क्तिरलङ्कारः—' स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् ' इति लक्षणात् । अपि चानेन वर्णनेन नायकस्य सात्त्विक-गुणाः सूचिताः । तेषु च माधुर्य-नामा गुण उपक्षिप्तः—' तन्माधुर्यं यत्र गात्रदृष्ट्यादेः स्पृहणीयता । सर्वा-वस्थासु सर्वत्र ' इति तल्लक्षणात् । ' दुःखेन लभते सुखम् ' इत्यत्र कारण-विरुद्धकार्योत्पत्तिरूपो विषमालङ्कारः । 'प्रेम्णो हि कुटिला गतिः' इत्यनेन सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । एवमनयोः सङ्करः ।

(३९) ' अभिप्रायश्छन्द आशयः ' इत्यमरः । ' मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिव—शब्दोऽपि तादृशः ।।' इत्युत्प्रेक्षा । सा च मुखज्योत्स्नागतरूपकानुप्राणितेति संकरः । ' मनोज्ञं मञ्जु मञ्जुलम् ' इत्यमरः ।

(४०) 'झम्पा'शब्दस्य प्रयोगः बाणभट्टे बाणभट्टाच्चार्वाचीनकवि-ष्वेव दृश्यते। तथा च बिल्हणः—'चकारास्मिञ्झम्पां हिमकरतटाके मन-सिजः।' इति । ' झम्पा सम्पातपाटवम् ' इति हेमचन्द्रः । अ-परिशिष्ट-स्थैकोनत्रिंशे श्लोकेऽप्ययं शब्दो मदनकविना प्रयुक्तो दृश्यते। 'मधुव्रतो मधु-करो मधुलिण्मधुपालिनः । ' इत्यमरः । तेषां सन्तानं सन्ततिरावलिरिति । ' विदूषकेण वक्तव्यो वयस्येति च भूपतिः ' इति वचनाद्विदूषकोऽत्र राजानं वयस्यवचनेनाह्वयति । तारेति । ' नृणामुरसि मध्यस्थो द्वाविंशति-विधो ध्वनिः । स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते । ' इति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

केचित् । 'लयप्रवृत्ति–नियमो यतिरित्यभिधीयते ।' इति वचनाद्यति-र्गीतसाम्यप्रवृत्तिनियमो लक्ष्यते । ते च यतयस्त्रयो गोपुच्छादयः ।

(४१) 'सप्तकं' इति, 'ग्राम्यो गीतध्वनिः' इति च । अत्र 'एतासामष्टादशानां सप्त स्वरनामधेयाः सप्तस्वराः ।' इति भरतमुनिः । सप्तानां समूहः सप्तकमिति । 'यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि । तथा स्वराणां संदोहो ग्राम इत्यभिधीयते ।।' इति ग्रामलक्षणम् । 'ग्रामत्रयेऽपि प्रत्येकं सप्त सप्त मूर्च्छना । इत्येकविंशतिर्मूर्च्छना भवन्ति' इति मल्लिनाथपादाः । मूर्च्छना-लक्षणं च 'क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् । सा मुर्च्छेत्युच्यते ग्रामस्था एता सप्त सप्त च ।।' इति । ते च त्रयो ग्रामा मन्द्र-मध्य-तारस्थाः । 'नन्द्यावर्तोऽथ जीमूतः सुभद्रो ग्रामकारत्रयः' इति ते प्रसिद्धाः । ग्रामोत्थो गीतध्वनिर्ग्राम्यो गीतध्वनिः । अत्र ग्राम्य–नागरत्व–विरोधोद्भासनाद्विरोधाभासालङ्कारः। 'आभासत्वे विरोधस्य' इति तल्लक्षणात् ।

(४२) अहंपढमियाऽहंपूर्विकेत्यर्थः । 'अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम्' इत्यमरः । 'थोर–थण–मंडलं' इति । बृहस्तनमण्डलमिति यावत् । थोरेति महाराष्ट्रभाषा–शब्दो बृहदित्यर्थे । कर्पूरमञ्जर्यामपि राजशेखरः "थोआणं थणआणँ कण्णकलिआलङ्घीणँ अच्छीणँ वा" इति पृथुस्तनानां वर्णनेन तरुणीसौन्दर्योत्कर्षं व्यनक्ति । अत्र 'स्थूलानां स्तनानां कर्णकलिकालङ्घिनोरक्ष्णोर्वा' इति तस्य गीर्वाणवाक्छाया विद्वज्जनसम्मता । अतः 'स्थूल' शब्दस्य प्राकृतभाषायां 'थोर' इति च्छाया भवितुमर्हतीत्यसंशयम् ।

(४३) अत्र रूपकानुप्राणितोऽतिशयोक्त्यलङ्कारः। ईदृशी कल्पनाऽन्यत्रापि दृश्यते–'वीर क्षीरसमुद्रसान्द्रलहरीलावण्यलक्ष्मीमुषस्त्वत्कीर्तेस्तुलनां कलङ्कमलिनो धत्तां कथं चन्द्रमाः ।' इत्यादौ, 'यदपि विबुधैः सिन्धोरन्तः कथंचिदुपार्जितं तदपि सकलं चारु-स्त्रीणां मुखेषु विभाव्यते' इत्यादौ च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(४४) लावण्यं कान्तिसारमित्यर्थः । 'स्रवन्त्यामपि वाहिनी' इत्यमरः । अन्तरिता तिरस्कृता निगूढेत्यर्थः । 'चूते चम्पककुसुमानि प्रादुर्भूतानि, चम्पकवृक्षे च पाटलिसुमानि विकसितानि ।' इत्येतदाश्चर्यकारकम् । अरिष्टमशुभमिति यावत् । 'दिष्टं क्षेमाशुभाभावेष्वरिष्टे तु शुभाशुभे ।' इत्यमरः ।

(४५) देव्याऽस्माकमाचार्यकं कृतम् । वयं देव्या शिक्षिताः । किम् । अत्र ध्वन्यते—यथैकस्मिन्वृक्षेऽन्यकुसुमारोपणं सिध्यति, तथा भवताऽपि पारिजातमञ्जर्याः स्वीकरणेनैवमेव क्रियतामिति । वृक्षायुर्वेदो वनस्पतिविषयकं शास्त्रमित्यर्थः । आचार्यस्य कर्माचार्यकम् । 'योपधाद्गुरूपोत्तमाद् वुञ् ।' (पा. V.1·132)

(४६) 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।' इत्यमरः । आह्लादतेतरां नितान्तमानन्दयतीत्यर्थः । पूर्वामुखेति । पूर्वस्या दिशो मुखेऽलङ्कृतावथवा पूर्वस्या दिशो मुखेनालंकृताविति । अत्र रूपकालङ्कारः । स च समासोक्तिमूलोऽतिशयोक्त्यनुप्राणित इति सङ्करः । परिरिप्सते परिरब्धुमिच्छतीत्यर्थः । अनेन नायक—नायिकयोरवस्थाविशेषोऽनुलक्षितः । मुग्धावस्था बाला प्रियतमधृष्टतां न सहसा सहत इति भावः ।

(४७) 'निर्बन्धः प्रार्थनातिशयः' इति मल्लिनाथपादाः 'निर्बन्धसंजातरुषार्थकार्श्यं' इत्यस्य व्याख्याने । वैयात्यं धाष्टर्यमित्यर्थः । 'धृष्टे धृष्णग्वियातश्च' इत्यमरः । अव्वो इति । अत्र राघवभट्टाः—'अव्वो इति दुःखे । "अव्वो सूचनादुःखसंभाषण—" इत्यादिसूत्रेण निपातः ।' इति ।

(४८) ताडङ्क इति । सर्वत्र प्रायः 'ताटङ्क'—शब्दस्य प्रयोगो दृश्यते गीर्वाणवाण्याम् । यथा 'ताटङ्कं नूपुरं स्रक्' इत्यत्र, 'दम्पत्योः पाक्षिकात्प्रेम्णः प्रेमाभावः सुखावहः । एककर्णस्थताटङ्कादताटङ्कं वरं मुखम् ॥' इत्यत्र, तथा च काव्यमीमांसादिषु राजशेखरविरचितेषु ग्रन्थेषु 'ताटङ्कवल्गनतरङ्गितगण्डलेखं'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्यादि-पद्येषु। कर्पूर—मञ्जर्यादिग्रन्थेषु कविशेखरो राजशेखरः 'ताडङ्क'—शब्दं खलु प्राकृतभाषायामेव प्रयुनक्ति। तथा 'ताडङ्कजुअं गण्डेसु' इति कर्पूर-मञ्जर्याम् (II. 37)। अत्र नाट्यशास्त्रोक्तो नियमो द्रष्टव्यः। 'ड इति भवति टकारो भटकुटकुटितटाद्येषु' इति। सहर्षावहित्थमिति। 'पाणि-र्लताख्यो यत्रैकस्तदन्यस्तु नितम्बगः। अवहित्थं समाख्यातं स्थानमागम-भूषणैः॥' इति भरतमुनिः। (नाट्यशास्त्रम् XIII. 165) अन्यथापीदं विशदीक्रियते। 'अवहित्थाकारगुप्तिः' इत्यमरः। 'लज्जाद्यैर्विक्रियागुप्ता-वहित्थाङ्गविक्रिया' इति दशरूपकम्।

(४९) यदियमिति। 'कामार्ताऽभिसरेत्कान्तं सारयेद्वाभिसारिका' इत्यपि दशरूपकम्। 'कान्तार्थिनी तु या याति सङ्केतं साभिसारिका' इत्यमरः। अत्राभिलाषरूपं नाट्याङ्गं—'सङ्गमोपायरचिता प्रारब्धाध्यवसायतः। सङ्कल्पेच्छासमुद्भूतिरभिलाष इतीरितः॥' इति सुधाकरवचनात्। 'अस्मा-न्पश्चिमेन' इत्यत्र 'एनपा द्वितीया' इति पाणिनीय-सूत्राद् द्वितीया विभक्तिः। अलसदृष्टिर्भावाकूतत्वं व्यनक्ति। तथा हि 'अलसवलितैः···भावाकूतं चमद्भिरिवेक्षणैः' इत्यमरुकः।

(५०) श्लक्ष्णेति। 'भ्रुकंसश्च भ्रुकुंसश्च भ्रकुंसश्चेति नर्तकः। स्त्रीवेषधारी पुरुषो' इत्यमरः। 'भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम्।' इत्यप्यमरः। 'यो वल्लभासन्नगतो विकारो गत्यासनस्थानविलोकनादौ। नानाविदाकूतचमत्कृतिश्च पराङ्मुखं चास्यमयं विलासः॥' इति नागर-सर्वस्वे विलासलक्षणम्।

(५१) रमणीयस्य भावः कर्म वा रामणीयकम्। 'योपधाद्गुरू-पोत्तमाद् वुञ्' इति (पा. V. 1·321) वुञ्-प्रत्ययः। अम्महे इति। अम्मो इति यावत्। अत्र राघवभट्टाः "'अव्ययम्' इत्यधिकारे 'अम्मो आश्चर्ये' इति सूत्रम्।" इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(५३) विम्भरियेति । साधर्म्यादुपमालङ्कारः । 'युद्धमायोधनं जन्यं' इत्यमरः । वैमानिकाः विमानैश्चरन्तोऽमरा इति यावत् । वैमानिकी देवाङ्गना । समरनिहतानप्सरसः कामयन्तेऽथवा प्रार्थयन्तीति भावः । तदर्थं प्रतीक्षन्ते विमानस्था इत्यर्थः। मुखाब्जानि निशाकरं तिरस्कुर्वन्तीति संकीर्णोत्प्रेक्षया दोषः । विगतच्छायो विच्छायस्तस्य भावो विच्छायता ।

(५४) अत्र हावभावादिविकारा नायिकामधिकृत्य व्यज्यन्ते । द्रष्टव्यमत्र मन्दारमरन्दचम्पू-पद्यम्:-'भाव इत्युच्यते प्राज्ञै रसाभिज्ञानयोग्यता । -षद्दृष्टविकारः स्याद्भावः प्रेमाभिसूचकः ॥ ' इति ।

अत्र कालिदासीयकल्पनां पल्लवयति कविः 'उच्छ्वासि' इत्यादिना । उक्तं च कालिदासेन 'अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तईथा प्रवृद्धम्' इत्यादि । स्तनयोः सीमाविवादे तनु मध्यमं माध्यस्थमीष्टेऽतोऽधःक्रियत इति ध्वन्यते । 'श्रोणी स्वभावत एव मन्थरा मन्दाऽसीत् । नयनयुगलं दीर्घं सदपि लास्यादियुतं नटीवदविश्वसनीयं' इति व्यज्यते ।

(५५) सातङ्कं साशङ्कमित्यर्थः । 'रुक्–ताप–शङ्कास्वातङ्कः' इत्यमरः । अनुवृत्तिरनुवर्तनम् । 'स्यादनुरोधोऽनुवर्तनम् । ' इत्यमरः । स्त्रीणां दक्षिणाक्षि–दक्षिणाङ्ग–स्पन्दनमशुभं सूचयति ।

(५६) अधृतिर्धैर्यध्वंसः । प्रतिभातीति । अत्र वाक्यार्थरूपेण काव्यलिङ्गम् । 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् । ' इत्युक्तेः ।

(५७) खण्डितेयं नायिका । तस्या लक्षणमलंकारसंग्रहे–'खण्डितेर्ष्यावती ज्ञातस्मरचिह्ने प्रिये यथा । ' इति ।

(५८) या समरभूमौ लब्धक्षणेक्षणलाभा मेघान्तरितचन्द्रदर्शन चकोरी चद्रस्य क्षणदर्शनेन सस्मिता सानन्दाऽभवं सेयमहं बालाऽधुना देव्या आगमनेन त्वयि तिरोभूते पुनः सीदामीति भावः । उपमालंकारः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(५९) अल्पो महान्वाऽपराधोऽपराध एव । तवापराधेन देवीदानीं कोपितैव । तदिदानीं तां प्रसादयितुं नार्हसि । न सा सद्यस्त्वयानुरोधेन प्रसादयाञ्चया वा प्रसादयितुं शक्या । अतस्त्वमिदानीं तामविगणय्य पारिजातमञ्जरीमेव प्रीणयस्वेति भावः । 'महाभागः श्रेष्ठः' इति शाकुन्तलविवरणे श्रीराघवभट्टाः । महाभागिनी श्रेष्ठाऽङ्गना पारिजातमञ्जरीत्यर्थः । **मारिदस्सेति** । इदं परिहासार्थमुक्तं नर्म-वाक्यम् ।

(६०) रविरथतुरङ्गमकान्तिसच्छायं हरिद्वर्णमित्यर्थः । रविर्हरिदश्व इति ख्यातः । रवेरश्वान्हरित इत्याचक्षते यतस्ते हरिद्वर्णाः । तत्कान्तिसदृशवर्णमिति यावत् । पार्वतीकान्तो नीलकण्ठस्तत्कण्ठच्छायासुन्दरं मरकतशिलारचितं मण्डपम् । श्लक्ष्णं मसृणम् । उद्वान्तमुद्गीर्णम् । अत्रायं शब्दः सौन्दर्यपोषको, न ग्राम्यत्वनिदर्शकः । 'निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ।' इत्युक्तेः । मरकतशिलामण्डपद्युतिकिसलयानां भ्रमराणां च गुणत एकरूपत्वात्सामान्यालङ्कारः । 'सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता' इति तल्लक्षणात् । लक्ष्मणशास्त्रिणस्त्वत्रोन्मीलितालङ्कारं मन्यन्ते स्म ।

(६१) अत्र यो रमणीयः कल्पनाविलासस्तत्र महाकविमदनस्येव जल्हणविरचितायां सूक्तिमुक्तावल्यामुद्धृतं 'देवी रतिर्विजयते' इत्यादि ('अ'–परिशिष्टस्थं प्रथमं) पद्यं द्रष्टव्यम् । शिलालेखस्थश्चतुष्पञ्चाशपङ्क्तिस्थः श्लोकस्तस्य चास्मत्कृता टीकाऽवधारणीयावत्र । यतः स एवार्थोऽत्र विशदीक्रियते । मध्यं त्रिवलि–युतमिति प्रसिद्धमेव । तन्माध्यस्थेऽपि सत्तनुप्रातिभं बभौ, अल्पीयसीं प्रतिभां धारयामासेत्यर्थः । अपि चात एवाधस्तात्तस्थाविति भावः । श्रीबिल्हणस्याप्येतादृशं पद्यमत्र द्रष्टव्यम्– 'दृशोः सीमावादः श्रवणयुगलेन प्रतिकलं स्तनाभ्यां संरुद्धे हृदि मनसिजस्तिष्ठति बलात् । नितम्बः साक्रन्दं क्षिपति रशनादाम परितः प्रवेशस्तन्वङ्ग्या वपुषि तरुणिम्नो विजयते ॥' इति । उपधायेति । उपधान-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थानेऽङ्कं कृत्वेत्यर्थः। योगनिद्रा विष्णोः शयानस्य सुप्रसिद्धैव। तस्यां भगवाञ्जागरूक एव वर्तते। तादृगियमपि वियोगोद्भूत--योगनिद्रायां जागर्त्येवेति ध्वन्यते।

(६२) **मुखज्योत्स्नेति**। मांसलं सान्द्रं घनमित्यर्थः। परभागं परगुणानित्यर्थः। इन्द्रनीलानां स्वगुणत्यागात्परगुणोपलब्धेस्तद्गुणालङ्कारः। तस्य च रूपकानुप्राणितत्वात्सङ्करः। अत्रापि लक्ष्मणशास्त्रिणः षट्पञ्चाशत्तमश्लोकवदुन्मीलितालङ्कारमुदाहरन्ति स्म॥ मरकतेति। 'पञ्चेषुणा तप्यमाना कृशाङ्गी तन्वी पारिजातमञ्जरी तत्तापं निवारयितुकामा, जलावगाहनं कर्तुमिच्छन्ती, ननु प्रतिबिम्बच्छलेन मरकतमयकुट्टिमायां भूमौ प्रविशति' इति यावत्। अत्र प्रतिबिम्बितत्वेन मरकतमयमेदिन्या जलस्य च गुण-साम्यं विवक्षितम्। अतः सामान्यालङ्कारः। 'छ' इत्यनेन 'छन्दसा' इति नाट्यनिदर्शनं ग्राह्यम्।

(६३) मकरध्वजो मदनः। व्यर्थकोऽयं श्लोक इति यल्लक्ष्मणशास्त्रिभिर्विवरणे दर्शितं, तत्समीचीनं नवेति न निर्धार्यते। यथा जीवन्त्या तनुमध्यया बलयानि (? भुवनानि) जयसि, तामेव निर्जीवां कुर्वन् निहत्य कथं नु त्वं प्रभविष्यसि, जगत एकातपत्रं प्रभुत्वमधिगमिष्यसीति भावः। अत्र चापलतया सह साधर्म्यात्साङ्गीयमुपमा मन्यते लक्ष्मणशास्त्रिभिः। "यथा चापलतयेव मकरध्वज जयसि श्लक्ष्णमध्यया। इति पूर्वार्धं पूरणीयम्। .... चापलतापक्षे निर्जीवां ज्यारहिताम्। 'जीवः प्राणिनि वृत्तौ च वृक्षभेदे बृहस्पतौ। जीवा जीवन्तिका मौर्वी' इति मेदिनी।" इति। तस्मिंस्तहावेति। स्थितिपाठ्यमिदं ज्ञेयपदम्—"प्राकृतं या वियुक्ता तु पठेदासनसंस्थिता। मदनानल-तप्ताङ्गी स्थितिपाठ्यं तदुच्यते॥" इति नाट्यशास्त्रोक्तलक्षणात्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(६४) अत्र कुसुमायुधवद्राजा कुसुमैस्तां प्रहरतीति सा तद्भ्रम-माश्रित्य वदति 'एस णिद्दओ' इति। अत्र भ्रान्तिमत्त्वाद्भ्रान्तिमदलङ्कारः। चतुःषष्टितमायां पङ्क्तौ तथा पञ्चषष्टितमायामपि द्वित्त्वार्थोऽङ्केन निर्दिष्टो यथा हिन्दी-भाषायां स निर्दिष्टो दृश्यते।

(६५) प्रथमस्पर्शे वधूरत्र पुलकाङ्किता रोमाञ्चिता भवतीति वर्ण्यते। एवमेव कुमारसम्भवेऽपि–'रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्खवकेतुरासीत्।' इति प्रपञ्चितम्। इदं तु वात्स्यायन-मत-विरुद्धम्। अत्र वात्स्यायनः–'कन्या तु प्रथमसमागमे स्विन्नाङ्गुलिः स्विन्नमुखी च भवति। पुरुषस्तु रोमाञ्चितो भवति। एभिरनयोर्भावं परीक्षेत।' इति। तथापीदं सात्त्विकोपलक्षणत्वान्न दोषायेति मल्लिनाथपादाः। 'स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू। अश्रुवैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः॥' इत्युक्तेः।

(६६) अनुबन्धः प्रकृतस्यानुवर्तनं॥ 'दोषोत्पादेऽनुबन्धः स्यात् प्रकृत्यादिविनश्वरे। मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने॥' इत्यमरः। निर्बन्धः प्रार्थनातिशयः। गाथा–सप्तशत्यामपि 'परव्वसो' इति शब्दः 'परवश' इत्यर्थे प्रयुक्तो दृश्यते।

(६७) **उत्थानमिति**। अत्र कालिदासीयश्लोकद्वयं, 'वाचं न मिश्रयति' इति, 'स्निग्धं वीक्षितं' इति चोपजीव्यते। 'विलम्बस्तु पथि व्याजात्परावृत्यापि दर्शनम्।' इति रतिविलासोक्तिः। अत्रानुरागेङ्गितम्। मदनोदयेऽप्युक्तम्–'विकारो नेत्रवक्त्रस्य तद्भावश्रवणादरः। अन्यव्याजेन तद्वीक्षा अनुरागेङ्गितं भवेत्॥' इति। **तल्पेति**। तल्पस्थानीन्दीवराणि तस्या मृद्वङ्गं मुद्रयन्ति काठिन्यादिति भावः। अत्र तदङ्गपेशलत्वनिदर्शनम्। सुरभिस्वेदेति। अनेन नायिकाया पद्मिनीत्वं ध्वन्यते। 'कमल–मुकुल–मृद्वी–फुल्ल–राजीव–गन्धा सुरत–पयसि यस्याः सौरभं दिव्यमङ्गे' इति वर्णनात्। 'मुख्यः स्यात्प्रथमः कल्पः।' इत्यमरः। प्रथमः कल्पः प्रथम-कल्पः। स एव प्रथमकल्पकः। मानः प्रथमकल्पको यस्मिन्मानप्रथम-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कल्पकः। स्त्रियां मानप्रथमकल्पिकीति भवेत्। मानप्रधानेति यावत्। मानप्राथमकल्पिकीति चिन्तनीया रूपसिद्धिः। प्राथमकल्पिक इति रूपं ठञ् प्रत्ययतो भवेत् सूत्राधारो यदि स्यात्। ततश्च मानः प्राथमकल्पिको यस्याः सा मानप्राथमकल्पिकीत्यपि कथं सिध्येदिति न जानीमः। टिडादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति। अनेन प्राथमकल्पिकात्प्राथमकल्पिकीति सिध्येत्। न पुनरेवं मानप्राथमकल्पिकी—शब्दस्य रूपसिद्धिः।

(६८) 'सौविदल्लाः कञ्चुकिनः' इत्यमरः। सौविदल्ला नरापनयनं कुर्वन्तीति सुविख्यातमेव। तथा हि—'राज्ञीर्नरापनयनाकुलसौविदल्लाः' इति माघः। सहसोत्थानेन नीविविस्रंसनं भवति। तद्वामः करः संरुणद्धि। राजदर्शनेन भावस्फुरणान्नीरङ्गीनिचयाञ्चलं सितान्तं पिनद्धस्तनं कञ्चुकमपि विश्लिष्टबन्धं भवति। तद्दक्षिणः करो यथास्थानं स्थापयतीत्यर्थः। कोमलालापभङ्ग्या मधुरश्लक्ष्णसंलापतरङ्गेणेति यावत्। झगिति सद्य एवेति यावत्। झटितीत्यर्थः। त्वदाभाषणेन वीणानिनदोऽपि तिरस्क्रियत इति भावः। अत्र सम्भोग—शृङ्गारः।

(६९) हस्ताभ्यामिति। अनेन नायिका राज्ञः प्रभुत्वं सूचयति। अद्वैते परमात्मना सहैकात्मता भवति, मनोऽप्यन्तर्विलीनं भवति। तथा प्रेयस्या सार्धमस्माकमेकात्मता भवति, मनश्चान्तर्मुखमानन्दमग्नं भवतीत्यर्थः॥

(७०) **श्रीखण्डेति**। श्रीखण्डप्रभविष्णु मलयजमित्यर्थः। मलयमारुतस्य चन्दनसाहचर्यात्सौरभवत्त्वं कविसमयः। अस्मन्मुखोच्छ्वासगन्धस्तत्सौरभगुणग्राहीत्यर्थः। अत्र साभिप्रायैर्विशेषणैर्वस्तु यद्विशिष्येतेतिलक्षणनिर्दिष्टः परिकरालङ्कारः।

(७२) वागुरानिपतितो हरिणोऽटतीति विरोधाभासालङ्कारः।

(७३) **दोषोद्घाटनमिति**। अपराधस्य स्फुटीकरणमिति यावत्। **त्वत्साहाय्यकेति**। न केवलमस्माकमनुनयेनैतत्साध्यं भविष्यतीत्यर्थः। सनर्म-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मितं नर्मणा स्मितं करोतीत्यर्थः। पट्टिं दिंतेणेति। पृष्ठभागस्य दर्शनेनानादरो व्यज्यत इति व्यञ्जयित्वा पारिजातमञ्जर्या महत्तां नृपाभिलषितत्वं च कनकलेखा सूचयति। 'देवी कृताभिषेकायामितरासु तु भट्टिनी' इत्यमरः। पारिजातमञ्जरीदानीमस्माकं द्वितीया भट्टिनी प्रमुखा राजयोषिदेवेति सूचितम्।

(७४) कर्णालङ्करणमिति। एष ताटङ्कः प्राग्देव्याः कर्णभूषणमासीत्तथा पारिजातमञ्जर्या अपि प्रतिबिम्बस्थानमासीत्। इदानीं तु नैष द्वयोरेकमप्यस्ति। अतस्ताडङ्कनामधेयमस्य ताडितत्वाद्दैवहतकत्वात्सदृशमेव संजातमिति भावः। एसेति। श्लेषवक्रोक्तिरत्र। "वक्त्रा तदन्यथोक्तं व्याचष्टे चान्यथा तदुत्तरदः। वचनं यत्पदभङ्गैर्ज्ञेया सा श्लेषवक्रोक्तिः।" इति रुद्रटप्रणीतकाव्यालङ्कारदत्तलक्षणात्।

(७५) 'कुसुममंजरि' इत्यनेन पारिजातमञ्जरी लक्ष्यते। छच्चरणचरिदेति। षट्चरणो भ्रमरः। तद्वदत्यन्तास्थिरवृत्तिरिति भावः। अनया सोपालम्भोक्त्या देव्या कोपः प्रकटीकृतः।

(७६) परिपाटी सन्ततिरनुक्रमो वा। 'आनुपूर्वी स्त्रियां वावृत्परिपाटी अनुक्रमः। पर्यायश्च' इत्यमरः। पाटवं पटुता। देवीति। अनेन राज्ञो दाक्षिण्यं प्रकटीकृतम्। 'चित्तानुवर्तनं यत्र तद्दाक्षिण्यमितीरितम्' इति वचनात्।

(७७) 'कृष्णे नीलासित–श्याम–काल–श्यामल–मेचकाः।' इत्यमरः। दोषेति। अपराधः। पक्षे नक्तमिति। 'अथ दोषा च नक्तं च रजनाविति।' इत्यमरः। अत्रैकदेशवृत्तिरूपकं, तच्च श्लेषानुप्राणितम्। इति तयोः सङ्करः। लक्षणशास्त्रिणस्त्वत्र प्रस्तुतालङ्कारमाहुः। सिंहद्वारि प्राग्द्वार इत्यर्थः। प्रासादस्य पूर्वभागे सिंहस्य प्रतिमाऽसीदस्मिन्काल इति स्पष्टं भवति। तथा च दृश्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(७८) नासीरेति । अत्र श्लेषमूलोत्प्रेक्षानुप्राणितातिशयोक्ति-रूपः सङ्करः ।

(७९) चिबुके स्पृष्ट्वा । अत्र प्रेयोऽलङ्कारः । स च भावनिबन्धनः ख्यातः । श्रीभोजराजरचितसरस्वतीकण्ठाभरणे " प्रेयः प्रियतराख्यातं चाटूक्तौ यद्विधीयते । " इति तल्लक्षणं दत्तम् ।

